--गुरुकुल पत्रिका का वार्षिक मूल्य--

देश में ६ रुपये | विदेश में १० रुपये | एक प्रति ६० पैसे

ओ३म्

गुरुकुल-पत्रिका

[गुरुकुलकांगड़ीविश्वविद्यालयस्य मासिक पत्रिका]

मार्गशीर्ष-वैशाखाः २०३१, जून ७५ सितम्बर ७५, वर्षम्-२७, अङ्काः ८१२-, पूर्णाङ्काः ३१७-३२१

श्रुति सुधा

ओ३म् ब्रह्मणस्पते सुयमस्य विश्वहा रायः स्याम रथ्यो वयस्वतः ।

वीरेषु वीरा उप पृङ्धि नस्त्वं यदीशानो ब्रह्मणा वेषि मे हवम् ॥

ऋ. २ २४।१५

हे ब्रह्मणस्पते ! हम (विश्वहा) सब दिन (सुयमस्य) सुनियन्त्रित (वयस्वतः) अन्नादि से युक्त (रायः) ऐश्वर्य के (रथ्यः स्याम) रथों पर ढोकर लाने वाले अर्थात् स्वामी हों। (त्वं) तू (नः) हमें (वीरेषु वीरान्) वीरों में भी वीर पुत्रों को (उप पृङ्धि) प्रदान कर (यत्) क्योंकि तू (ईशानः) ईश है, समर्थ है अतः (ब्रह्मणा) ब्रह्मशक्ति द्वारा (मे हवं वेषि) मेरे आह्वान व कामना को पूरा कर।

सुयमस्य–सु + यम् । रथ्यः –रथा एषां सन्तीति रथ्यः । वयस्वतः –वयः अन्नं तद् वतः । उप पृङ्धि– उप + पृची सम्पर्के । वेषि–वी गतिप्रजनकान्त्यसनखादनेषु ।

—o—

अग्निमन्त्रमाला

(श्री अरविन्दप्रणीत 'Hymns to the Mystic Fire' ग्रन्थस्य धारावाहिकोऽनुवादः, अनुवादकोपज्ञेन भावार्थेन तदुपज्ञनानाविधटिप्पणीभिश्च संवलितः)

अनु० श्री जगन्नाथो वेदालंकारः

ऋ. १. ३६

कण्वो घौरः । अग्निः, १३-१४ यूपो वा ।

सं सीदस्व महाँ असि
शोचस्व देववीतमः ।
वि धूममग्ने अरुषं मियेध्य
सृज प्रशस्त दर्शतम् ॥

[1]सम् । [2]सीदस्व । [3]महान् । [4]असि । [5]शोचस्व । [6]देव-वीतमः । [7]वि । [8]धूमम् । [9]अग्ने । [10]अरुषम् [11]मियेध्य । [12]सृज । [13]प्र-शस्त । [14]दर्शतम् ॥

[1],[2]Take thy established seat, [3]wide, [4]art thou,[5]shine in the purity,[6]revealing utterly the godhead, [12]pour, [7]forth, [9]O thou, [11]of the sacrifice, thy [10]red active, [8]smoke of passion, [13]thou wide-mani-fested. [14]that full of vision.

[9]अग्ने ! [1]सम्यक् [2]आसीनो भव, निजं स्थिरमासनमलंकुरु त्वं [3]विशालः [4]असि [6]देवमतिशयेन प्रकाशयन् [5]स्वीयशुचितया दीप्यस्व [11]मेध्य, यज्ञिय [13]विशालतयाऽभिव्यक्त । अग्ने ! स्वकीयम् [10]आरोचमानं, रक्तवर्णं क्रियाशीलं च [14]अन्तर्दृष्टिसम्पन्नं [8]शक्तिवेगमयवाष्पं [7],[12]विमुञ्च, प्रवर्ष ।

भावार्थः

हे अग्ने ! त्वमत्र विराजस्व, स्वकीयं सुस्थिरमासनं स्वीकुरु । त्वं महान् व्यापकश्चासि । देवत्वं पूर्णतया प्रकटयंस्त्वं निजशुचिरूपेण रोचस्व, प्रकाशस्व । हे यज्ञिय ! विश्वतोऽभिव्यक्त अग्ने! स्वकीयमरुणमन्तर्दर्शनमयम् ऊर्जवेगात्मकं धूमं विसृज, आविष्कृत्य प्रसारय ।

प्रतीकविवरणम्

[8]धूमम् ! धूञ् कम्पने इत्यतो व्युत्पन्नोऽयं शब्दः शक्तिवेगोत्पन्न वाष्पगतितुल्यं कम्प सङ्केतयति अन्तरर्थे ।

व्याकरणम्

[2],[4]'सीदस्व' 'शोचस्वे'त्युभयत्र व्यत्ययेनात्मनेपदम् । [6]देव-वीतम. । देवं देवान् वा वेति व्यनक्तीति देववीः । क्विप् । सर्वेषामतिशयेन देववीः । तमप् ।

[10]अरुषम् । इयर्ति गतिं क्रियां वा कुरुते दीप्यते चेति अरुषस्तम् ।

ऋ गतौ इति जौहोत्यादिको धातुर्वेदे गति-प्राप्ति-दीप्ति-तपनादिषु विविधार्थेषु दृश्यते । तत्र गति-दीप्त्यर्थकाद् अस्माद् औणादिक उषच् प्रत्ययः उपसंख्येयः 'पॄ-नहि-कलिभ्य उषच्' (उणा. ४. ७५) इत्यन्तर्गतम् । तदन्ताद् द्वितीयैकवचनम् ।

स्कन्दस्वामिनस्तु आङ्पूर्वकाद् रुश दीप्तावित्यतः पचाद्यचि, छान्दसे गुणाभावे, आङो ह्रस्वे, शकारस्य मूर्द्धन्ये च निष्पन्नं मन्यन्ते शब्दमिमम् ।

यास्कस्तावत् 'अरुषीरारोचनात्' (निरुक्त. १२. १. ८) इति निर्ब्रुवन् आङुपसृष्टाद् रोचतेर्दीप्त्यर्थात् कर्तरि अच्प्रत्ययेन व्युत्पादयन् प्रतिभाति पदमिदम् ।

वै० प० कोषकाराश्च 'अरु' शब्दे उपपदे 'सन्' धातोर्डप्रत्ययेन व्युत्पादयन्ति ।

[11]मेध्य । मेधो यज्ञस्तमर्हतीति मेध्यः । अर्हार्थे यत् । मकारात्पर इयागमश्छान्दसः । संबोधनैकवचनम् ।

[14]दर्शतम् । पश्यतीति दर्शतस्तम् । दृशेरतच् औणादिकः । स चात्र बाहुलकात् कर्तरि बोध्यः ।

कण्वो घौरः । अग्निः । सतोबृहती ।

१. ३६. १०

यं त्वा देवासो मनवे दधुरिह
यजिष्ठं हव्यवाहन ।
यं कण्वो मेध्यातिथि र्धनस्पृतं
यं वृषा यमुपस्तुतः ॥

[1]यम् । [2]त्वा । [3]देवासः । [4]मनवे । [5]दधुः । [6]इह ।
[7]यजिष्ठम् । [8]हव्य-वाहन ।
[9]यम् । [10]कण्व. । [11]मेध्य–अतिथि । [12]धन-स्पृतम् ।
[13]यम् । [14]वृषा । [15]यम् । [16]उप-स्तुतः ॥

[2]Even thou, [1]whom, [3]the Gods, [5]have set, [6]here, [4]for man, [7]most strong for the sacrifices, [8]O bearer of the offering, [9]whom, [10]Kanwa, [11]Medhyatithi, has established [12]as a seizer for him of his desired wealth, [13]whom, [14]the mighty Indra, [15],[16]and all who established by the song of praise.

[8]हे हविर्वाहक ! [7]यष्टृतमं । [1]यं । [2]त्वाम् अग्निम् । [3]देवाः । [6]अत्र यज्ञवेदौ । [4]मनुष्याय । [5]निहितवन्तः । यजमानाय । [12]अभीष्टैश्वर्यस्य प्रापकम् । [9]यं त्वामग्निम् । [11]यज्ञियात्मा । [10]मेधावियजमानः । [5]दधौ । इति शेषः, [13]यं । [14]शक्तिशालीन्द्रः । [15]यं । च [16]सर्वोऽपि उपस्तोता स्तोत्रैः दधौ तमग्नि वर्धयामसीत्युत्तरेणान्वयः ।

भावार्थः

हे हव्यवाहन ! याजकतमस्त्वं, यजने समर्थतमः, एतादृशं यं त्वां देवा मनुष्याय अत्र स्थापयामासुः यञ्च पवित्रात्मा, मेधावी यजमानः स्वाभीष्टदिव्यधनप्रापकत्वेन स्वान्तरे अस्थापयत्, यञ्च शक्तिशाली इन्द्र सर्वे स्तुतिगायकाश्च स्थ पयाञ्चक्रुः तं त्वां वयं वर्धयेम ।

व्याकरणम्

[7]यजिष्ठम् । यष्टृशब्दादगुणवचनादपि 'तुश्छन्दसि' इति आतिशायनिक इष्ठन् तृलोपः ।

[11]मेध्य-अतिथिः । मेध्यः पवित्रो यज्ञियश्चातिथिरात्मा यस्य सः । अतिथिशब्दोऽत्र यौगिकः, अतति सततं गच्छतीत्यतिथिरर्थादात्मा । सततगमनशीलोऽतिथिरेवैक आत्माऽस्मिन् ससारे ।

[12]धन-स्पृतम् । धन स्पृणोति बलेनाधिकरोतीति धनस्पृत् तम् । स्पृ प्रीतिबलयोः इत्यतः क्विप् । यद्वा, धनेनास्मान् स्पृणोति प्रीणयतीति धनस्पृत् तम् ।

[16]उप-स्तुतः । उपस्तौतीति उपस्तुतः । कर्तरि क्तः । यद्वा, उपस्तुवन्तीति उपस्तुतः । उपपूर्वात् स्तौतेः कर्तरि क्विप् ।

कण्वो घौरः। अग्निः। बृहती।

१. ३६. ११

यमग्निं मेध्यातिथिः
कण्व ईध ऋतादधि।
तस्य प्रेषो दीदियुस्तमिमा ऋचस्
तमग्निं वर्धयामसि॥

[1]यम्। [2]अग्निम्। [3]मेध्य-अतिथिः।
[4]कण्वः। [5]ईधे। [6]ऋतात्। [7]अधि।
[8]तस्य। [9]प्र [10]इषः [11]दीदियुः [12]तम् [13]इमाः [14]ऋचः।
[15]तम्। [16]अग्निम्। [17]वर्धयामसि॥

Even that [2]Agni, [1]whom. [3]Medhyatithi, [4]Kanwa, [5]has kindled, high [7]upon [6]the truth, [11]may, [8]his, [10]impulses, [11]blaze, [9]forth, [12]him, [17]may, [13]these [14]fulfilling Words, [15]him, even [16]Agni, [17]may we increase.

[1]यम्। [2]अग्निदेवम्। [3]यज्ञियात्मा। [4]प्राज्ञो यजमानः। [6]सत्यस्य। [7]आधारे। सत्यमाधारीकृत्य [5]उद्दीपितवान्। [8]तस्य अग्नेः। [10]प्रेरणाः। [9,11]प्रभासेरन्। [12]तम्। [13]इमाः। [14]सिद्धिप्रदा मन्त्रवाचः। [17]वर्धयन्ति।ᵠ ऋचो वर्धयेयुरित्यर्थः [15]तम्। [16]अग्निम्। वयमपि। [17]वर्धयेमहि।

भावार्थ

यमग्निं मेध्यातिथिः कण्वः सत्यस्याधारतः समुज्ज्वलं कृतवान् तस्य प्रेरणाः भास्वरतया प्रस्फुरिता भवेयुरस्मासु, इमाः पूर्णताप्रदा दिव्यगिरस्तं वर्धयेरन्, वयमपि तमग्निं वर्धयेमहि।

व्याकरणम्

[5]ईधे। ञिइन्धी दीप्तौ इत्यस्माल्लिटि प्रथमपुरुषैकवचने वैदिकं रूपम्। कास्प्रत्ययादाममन्त्रे लिटि इत्यत्र 'अमन्त्रे' इति प्रतिषेधात् आमभावः (पा. ३.१.३५)। इन्धि-भवतिभ्यां चेति लिटः कित्त्वान्नलोपः (पा. १.२.६; ६.४.२४)।

[6]ऋतात्। ऋते इति वक्तव्ये विभक्तिव्यत्ययः।

[7]अधि। अधीति निपातत्वादव्ययम्। अत्रायं निपातोऽधिकरणप्रवचनः कर्मप्रवचनीयः, ऋतात् अधि=सत्यस्य आधारे इत्येवम् अधिकरणार्थस्यैव समर्पयितुमिष्टत्वात्।

अधेरर्थास्तावदेवं परिगणिता गणरत्नमहोदधौ- 'अधिरध्ययनैश्वर्यवशित्व-स्मरणाऽधिके। अथ चास्य हीन-विशेषाऽतिशयविषयत्वाऽध्यारूढोपरिभावादयोऽन्येऽर्था अपि उपसङ्ख्येयाः।

[11]दीदियुः। दीदयति ज्वलतिकर्मसु (दीप्त्यर्थकेषु) पठितो निघण्टौ (१.१६.)। तस्माल्लिटि झेरुसि इयङ्।

[17]वर्धयामसि। विध्यर्थे लट्। मसः इकारागमः

कण्वो घौरः। अग्निः। सतोबृहती।

१. ३६. १२

रायस्पूर्धि स्वधावोऽस्ति हि ते-
ऽग्ने देवेष्वाप्यम्।
त्वं वाजस्य श्रुत्यस्य राजसि
स नो मृड महाँ असि॥

[1]रायः। [2]पूर्धि। [3]स्वधा-वः। [4]अस्ति। [5]हि। [6]ते
[7]अग्ने। [8]देवेषु। [9]आप्यम्।
[10]त्वम्। [11]वाजस्य। [12]श्रुत्यस्य। [13]राजसि।
[14]सः। [15]नः। [16]मृड। [17]महान्। [18]असि।

[2]Complete, our [1]felicities, [3]O thou who hast the self-fixity, [5]for, [6]with thee

ᵠ 'वर्धयामसि' इति तिङन्तपदस्य पुरुषव्यत्ययेन 'वर्धयन्ति' इति पदमाक्षिप्तं वाक्यपूरणार्थम्।

[7]O Agni, [4]is, [9]effctivity, [8]in the gods, [10]thou, [13]rulest over, [11]the wealth, [12]of inspired knowledge, [16]show thou, [14]then, [16]favour, [15]to us, [17]great, [18]art thou.

[3]हे स्वधावन्,स्वधारणसामर्थ्यरूपस्वभावशालिन् [7]अग्ने ! [1]अस्माकमानन्दैश्वर्याणि । [2]परिपूरय । [5]यतः [7]देवतासु [6]तव । एव [9]कर्मक्षमत्वम् । [4]वर्तते । [10]त्वम् । [12]अन्तःश्रुतज्ञानरूपस्य । [11]ऐश्वर्यस्य । [13]राजाऽसि । [14]ईदृशः त्वम् । [15]अस्मासु । [16]अनुग्रह कुरु । त्वं [17]बृहन् । [18]असि । गुणवैभवैरिति भावः ।

भावार्थः

हे स्वधारणशक्तिसम्पन्न अग्ने ! आनन्दैश्वर्येण परिपूरयास्मान्, यतोऽन्यदेवेषु यत् कर्मक्षमत्व तत् तवैवास्ति । तव द्वारेण, तव साहाय्येनैव देवाः कर्मक्षमाः, निजैश्वर्यप्रदानादि क्षमाः (अतः सर्वदेवानामैश्वर्यं त्वद्द्वारैव प्रार्थयाम इति भावः) । त्वम् अन्तःश्रुत (अनुप्रेरित)-ज्ञानैश्वर्यस्य प्रभुरसि । अतोऽस्मासु कृपां कुरु, सुखयाऽस्मान् । त्व प्रभावेणैश्वर्येण च महानसि ।

व्याकरणम्

[2]पूर्धि । पृ पालनपूरणयोरित्यतो लोण्मध्यमपुरुषैकवचनं हेर्धिरादेशः शब्लुक् च छान्दसः ।

[3]स्वधा–वः । स्वधाऽस्यास्तीत्यर्थे भूम्नि मतुप् 'सम्बुद्धौ मतुवसोः,' इति रुत्वम् ।

[9]आप्यम् । आप्नोति व्याप्नोति जीवनं यद्वा आप्यते फलमनेन इति अपः कर्म । शब्दोऽयं कर्मनामसु पठितो निघण्टौ (२.१) । व्याप्तिविशिष्टं कर्म चास्य मुख्योऽर्थः ।

आप्लृ व्याप्तौ इत्यस्मात् कर्मार्थे 'आपः कर्माख्यायाम्' (उणा॰ ४.२०७) इति असुन् धातोर्ह्रस्वश्च । नुडागमस्य वैकल्पि तदभावपक्षे 'अपस्' इति प्रातिपदिकं निष्पद्यते ।

अपसो भावः आप्यम् । अगुणवचनादपि 'अपस्'शब्दाद् भावे ष्यञ् छान्दसः, टिलोपश्च ।

[12]श्रुत्यस्य । श्रुतिशब्दाद् 'भवे छन्दसि' इतियत्

कण्वो घौरः । अग्निः यूपो वा । बृहती ।

१ ३६. १३

ऊर्ध्व ऊ षु ण ऊतये
तिष्ठा देवो न सविता ।
ऊर्ध्वो वाजस्य सनिता
यदञ्जिभिर्वाघद्भिर् विह्वयामहे ।

[1]ऊर्ध्वः । [2]उँ इति । [3]सु । [4]नः । [5]ऊतये । [6]तिष्ठ । [7]देवः । [8]न । [9]सविता । [10]ऊर्ध्वः । [11]वाजस्य । [12]सनिता । [13]यत् । [14]अञ्जि-भिः । [15]वाघत्-भिः । [16]वि ह्वयामहे ॥

[1]utterly high uplifted, [6]stand, [4]for our, [5]growth, [8]like, [7]the god, [9]savitri, [10]it is from these heights, that thou be comest, [12]the saviour, [11]of our store [13]when, [16]we call, on thee, [14]with our revealing [15]chants. [2, 3 expletives]

हे अग्ने ! त्वम् [4]अस्माकम् । [5]अभिवृद्धये, विकासाय । [9]सविता । [7]देवः । [8]इव । [1]अत्युच्चशिखरस्थः । [6]भव । [13]यदा । [14]दिव्यपदार्थाभिव्यञ्जकैः । [15]स्तोतृभिः, तदुपलक्षितमन्त्रात्मक स्तोत्रवाग्भिः । वयं त्वां [16]विशेषेणाह्वयामः । तदा त्वम् । [10]उच्चशिखरस्थः । एव अस्माकम् [11]ऐश्वर्यस्य । [12]रक्षिता । भवसीति शेषः ।

२,३ उञ्-सुञौ निपातौ अत्र पादपूरणौ ।

भावार्थः

सवितृदेव इव त्वमस्मद्विकासाय ऊर्ध्वस्तिष्ठ,

मशिखरस्थो भव । वयं त्वां स्तोतृणां नर्मन्त्रवाग्भिराह्वयामः या दिव्यानि वस्तूनि रहस्यानि च व्यञ्जन्ति । एवमाहूतस्त्वमुच्चशिखरेभ्य एव अस्मदैश्वर्यस्य रक्षिता भवसि ।

व्याकरणम्

[3]ऊं इति । उञः प्रगृह्यत्वात् पादपाठे इतिकरणम् । इतौ परे च तस्य ऊं इत्यादेशः (पा. १. १८) । संहितायाम् 'इकः सुञि' इत्यनेन पूर्वपदस्य दीर्घः ।

[5]सु । सस्य षत्वम् ।

[6]नः । नस्य णत्वम् ।

[8]न 'न' इति निपातो भाषायां प्रतिषेधार्थे प्रसिद्धः, छन्दसि तु प्रतिषेधार्थीय उपमार्थीयश्च । तत्रैष विवेक :– प्रतिषेधार्थोऽयं यत् प्रतिषेधति तस्मात् पूर्वं प्रयुज्यते। तद्यथा 'न जमि-भिः वि विकिते' (१. ७१७[11]) । अथोपमार्थीयोऽयं येनार्थेन उपमेयार्थमुपमिमीते तस्मात् परं प्रयुज्यते । तद्यथा 'तिष्ठ देवः न सविता' (प्रकृतमन्त्रे) । तथा चाह यास्कः "नेति प्रतिषेधार्थीयो भाषायाम् । उभयमन्वध्यायम् । प्रतिषेधार्थीयः पुरस्तादुपचारस्तस्य यत्प्रतिषेधति ।...उपमार्थीय उपरिष्टादुपचारस्तस्य येनोपमिमीते ।" (निरु. १. २. १) ।

[14]अञ्जि भिः । अञ्जन्ति व्यञ्जयन्ति प्रकाशयन्तीत्यञ्जयस्तैः । अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु इत्यतः 'खनिकष्यञ्जि' इत्यादिना इप्रत्यय ।

[15]वाघत्-भिः । वाघत् इति ऋत्विङ्नाम (निघ. ३. १८) । यज्ञं वहद्भिर्ऋत्विग्भिरिति सायणः । याजयितृविशिष्टस्तोतारं लक्षयति ।

कण्वो घौरः । अग्निः यूपो वा । सतोबृहती ।
१. ३६. १४

ऊर्ध्वो नः पाह्यंहसो नि केतुना
विश्वं समत्रिणं दह ।
कृधी न ऊर्ध्वाञ्चरथाय जीवसे
विदा देवेषु नो दुवः ॥

[1]ऊर्ध्वः । [2]नः । [3]पाहि । [4]अंहसः । [5]नि । [6]केतुना । [7]विश्वम् । [8]सम् । [9]अत्रिणम् । [10]दह । [11]कृधि । [12]नः । [13]ऊर्ध्वान् । [14]चरथाय । [15]जीवसे । [16]विदाः । [17]देवेषु । [18]नः । [19]दुवः ॥

[1]High-raised, [3],[5]Protect, [2]us, [4]from the evil, by the perceiving mind, [10]burn [8]utterly, [7]every, [9]eater of our being, [11],[13]raise, [12]us too,[13]on high, [14]for action [15]for life, [16]distribute, [17]among the gods [18]our, [19]activity.

[1]ऊर्ध्वस्थितः । त्वम् [6]अन्तर्ज्ञानमयमनसा । [2]अस्मान् । [4]पापात्, दुरितात् । [5]नितरां । [3]रक्ष । [7]सर्वम् । [9]अत्तारम्, अस्मत्सत्ताया भक्षकं, राक्षसं । [8]सम्यक् । [10]भस्मसात् कुरु, [12]अस्मान् । अपि [14]कर्मणे [15]जीवनाय । च [13]उन्नतान् । [11]कुरुष्व । [18]अस्माकं [19]कर्म । [17]देवानां मध्ये । [16]लम्भय, वितर । हव्यरूपेण यथायथमिति भावः ।

भावार्थः

ऊर्ध्वस्थो भूत्वा त्वं दृष्टिसम्पन्नमनसा अस्मान् दुरितमात्रात् रक्ष, अस्मत्सत्ताया भक्षकं प्रत्येकं राक्षसं पूर्णतया दग्धं कुरु । उच्चकर्मसंपादनाय उच्चजीवनाय चास्मानुन्नय, इहस्थानस्मान् अत्रैव ऊर्ध्वगामिनः कुरु । अस्मत्कार्यकलापं देवेषु विभज, हवीरूपेण अर्पय यथास्वम् ।

व्याकरणम्

[4]अंहसः । अमति गच्छति प्रायश्चित्तेन इति अंहः । अम गत्यादिषु इति भौवादिकाद् धातोः

'अमे हुंकच्' इत्युणादिसूत्रेण (४.२१२) असुन् हुक् च । यद्वा, हन्ति नाशयति कर्तारमित्यंहः हन्तु योग्यमित्यंह इति वा । हन्तेः 'सर्वधं तुभ्योऽसुन्' इत्यसुनि धातोर्हकारस्य उपधायाश्च ('अन् भागस्य) विपर्ययेण 'अंहस्' इति निष्पद्यते ह + अन् + अस् = अन् + ह + अस् – अंहस् । तथा च ह यास्कः :– 'अंहश्च अंहुश्च हन्ते निरूढोपधाद् विपरीतात्' (निरु ४.४.२४) । अथवा अंहते वक्रगतिं करोतीत्यंहः पापम् । अहेरिव खलु वक्रा गतिरंहम । 'अहि प्लिह वक्रगतौ इति काशकृत्स्नधातुपाठे पठिताद् (पृ ११२) अहंतेरसुनि 'अंहस्' इति प्रातिपदिकं निष्पाद्यम् । तस्मात्पञ्चम्येकवचनम् ।

[6]केतुना । कित ज्ञाने इत्यस्माद्प्रत्यय औणादिको बहुलकात् ।

[9]अत्रिणम् । अद भक्षणे इत्यस्माद् 'अदेस्त्रिनिश्च' (उणा. ४ ६८) इत्यनेन त्रिनिप्रत्यये द्वितीयैकवचनम् ।

[11]कृधि । करोते लेण्मिध्यमपुरुषैकवचनम् । विकरणस्य लुक् । 'श्रुशृणुपॄकृ' इत्यादिना छन्दसि हेर्धिरादेशः 'अन्येषामपि दृश्यते' इति संहितायां दीर्घः ।

[14]चरथाय । चरते र्भावे अथप्रत्यय औणादिकः ।

[15]जीवसे । जीव प्राणधारणे इति धातोः तुमर्थे असेप्रत्ययः ।

[16]विदाः । विदॢ लाभे इत्यस्मादन्तर्भावितण्यर्थात् लेटि सिपि रूपम् आडागम ।

[19]दुवः । दुवस्यतिः परिचरणकर्मा (निघ. ३.५) । दुवः परिचर्यात्मकं कर्मेत्यर्थः ।

कण्वो घौरः । अग्निः । बृहती ।

१. ३६. १५

पाहि नो अग्ने रक्षसः
पाहि धूर्तेरराव्णः ।
पाहि रीषत उत वा जिघांसतो
बृहद्भानो यविष्ठ्य ॥

[1]पाहि । [2]नः । [3]अग्ने । [4]रक्षसः ।
[5]पाहि । [6]धूर्तेः । [7]अराव्णः ।
[8]पाहि । [9]रिषतः । [10]उत । [11]वा । [12]जिघांसतः ।
[13]बृहद्भानो इति बृहत्ऽभानो । [14]यविष्ठ्य ॥

[1]Protect, [2]us, [3]O Agni, [4]from the Rakshasa, [5]protect, us [6]from the harm, [7]of the undelighting, [8]Protect, us [9]from him who assails, [10],[11]and, [12]him who would slay us, [13]O Vast of lustre, [14]O mighty and young.

[3]हे अग्ने ! त्वम् [2]अस्मान् । [4]राक्षसात् । [1]रक्ष, । [7]निरानन्दस्य, आनन्दप्रदानाऽक्षमस्य पदार्थस्य पुरुषस्य वा । [6]हिंसायाः तत्कृतायाः हानेः इत्यर्थः । [5]रक्ष । [13]बृहत्प्रभाशालिन्, । [14]युवतम, महाशक्तिमय । [9]आक्रामतः । [10]अपि । [11]वा । अस्मान्, [12]हन्तुमिच्छतः मानुषादमानुषाद् वा । नः [8]रक्ष ।

भावार्थः

हे अग्ने ! अस्मान् बाधकाद् राक्षसादेः पाहि निरानन्दवस्तु (व्यक्ति) कृताद् द्रोहात् अस्मान् रक्ष हे विशालज्योतिर्मय, हे युवतम, हे शक्तिशालिन् रक्ष रक्षास्मान् सर्वतः ।

व्याकरणम्

[6]धूर्तेः । धुर्वी हिंसार्थः । तस्मात् स्त्रियां भावे क्तिन् ।

[7]अराव्णः । न राति न ददात्यानन्दमिति अरावा तस्य निरानन्दस्येत्यर्थः रा दाने इत्यस्मा-

ादिकाद् 'आतो मनिन्' (पा. ३. २. ७४) इति वनिप्। तदन्तस्य नञा तत्पुरुषः। षष्ठ्येकवचनम्।

तदेवमनया रूढव्युत्पत्त्या श्रीअरविन्दाभिमतोऽस्य पदस्यार्थः सूपपादः। वस्तुतस्तु तन्मतेन पदमिदं 'रि' धातोर्व्युत्पन्नं स्वीकर्तव्यम्, न तु रा दाने इत्यतः।

(See Sri Aurobindo Path Mandir Annual, Jayanti No. 12-15th August 1953-the article entitled 'Riks of Madhucchands,' Page 9)

'रि गतौ' इति तौदादिकस्य धातोर्दानार्थोऽपि उपसंग्राह्यः, अनेकार्थत्वाद् धातूनाम्, यद्वा एतदर्थको वैदिको 'रि' धातुरभ्युपेयः। तस्माच्च भावेऽर्थे 'रातेर्डैः' (उणा-२.६.७) इत्यनेन बाहुलकात् डैप्रत्यये कृते 'रै' इति आनन्दार्थकं प्रातिपदिकं निष्पाद्यम्। ततश्च, रायः आनन्दाः अस्य अस्मिन् वा सन्तीत्यर्थे 'छन्दसीवनिपौ च वक्तव्यौ' (पा. ५. २. १०९) इति वार्तिकेन रैशब्दात् वनिप्। ऐकारस्यात्वं छान्दसम्। न रावा इत्यरावा इतिनञ् तत्पुरुषः।

अथवा 'रा'धातो र्व्युत्पन्नमैश्वर्यवाचकं 'रै' शब्दं वेदस्यान्तरर्थे आनन्दैश्वर्यवाचक मत्वा तस्मादेव तद्धिते वनिप्प्रत्यये कृते व्युत्पत्तिः सुगमतरा स्यात्।

[8]रिषतः। रिश हिंसायामित्यतो लटः शत्रादेशः, शकारस्य मूर्धन्यः, संहितायाम् इकारस्य दीर्घश्च छान्दसौ।

[13]बृहद्भानो इति बृहत्-भानो। बृहन्तो महान्तो भानवो रश्मयो यस्य तथाभूत।

कण्वो घौरः। अग्निः। सतोबृहती।

१. ३६. १६

घनेव विष्वग्वि जह्यराव्णस्-
तपुर्जम्भ यो अस्मध्रुक्।
यो मर्त्यः शिशीते अत्यक्तुभि-
र्मा नः स रिपुरीशत॥

[1]घना-इव। [2]विष्वक्। [3]वि। [4]जहि। [5]अराव्णः।
[6]तपुः-जम्भ। [7]यः। [8]अस्म ध्रुक्।
[9]यः। [10]मर्त्यः। [11]शिशीते। [12]अति। [13]अक्तु भिः
[14]मा। [15]नः। [16]सः। [17]रिपुः। [18]ईशत॥

[1]As with thick falling blows, [3,4]scatter, [2]utterly, (or [3,4]scatter, [1]like clouds, [2]to every side[1]) [5]all the powers of undelight, [6]O devourer of their force (or destroyer of affliction), and him, [7]who [8]would do us harm, [9]what so ever, [10]mortal being, [12,11]exceeds, us [13]by the Keenness of his actions, [18a]may [16]he, [14]not, as our, [17]enemy, [18b]have mastery, [15]over us.

[5]निरानन्दस्य, दुःखस्य शक्तीः। [1]घनप्रहारैरिव पतद्भिः [2]सर्वतः, सम्पूर्णतया। [3,4]शीर्णविशीर्णाः कुरु। यद्वा, [1]मेघानिव। ताः [2]समन्ताद्। [3,4]विकर छिन्नभिन्नाः कुरु। [6]हे तासां सामर्थ्यविनाशक, हे सकलदुःखभञ्जन। [7]यो जनः। [8]अस्मभ्यं द्रुह्यति। तमपि घनेव विश्वक् वि जहीति पुनरन्वेतव्यम्। नाशय तं सततमुद्गरपातैरित्यर्थः। [9]यः। [10]मरणशीलो मनुष्यः। [13]निजतीक्ष्णकर्मभिः, कर्मणां तीक्ष्णतया। अस्मान् [12,11]अतिशेते। [16]सः। [17]अस्माकं शत्रुः। भवन्, शत्रुतयेत्यर्थः [15]अस्मान्। [14]न। [18]ईशीत, अस्मदुपरि प्रभुत्वं नासादयेत्।

(क्रमशः)

किं नाम सुमनः ?

आशा, संस्कृतशिक्षिका, श्रीअरविन्दाश्रमः, पाण्डिचेरी

कुसुमं पश्यन्त्या मम मनसि प्रश्नः जागरितः- किं नाम सुमनः ? हे प्रकृते ! अपि तव नीरवचिर-नवीनसौन्दर्यस्य मुखर प्रतिच्छविरेषा या मामाह्ला-दयति ? किं नु तव प्रदीप्तकान्त्याः विमलज्योतिः एतद् यत् मां प्रसादयति । किमु अनन्ततायाः सुमधुरसुहासः एषः यः सर्वत्र दृष्टिगोचरो भवति ? बीजं सुरम्यकोरके परिणमति,मुकुलितः कोरकः स्वर्ग-समुज्ज्वलपावित्र्यं विकिरन् प्रस्फुटति यद् वयं पुष्पमिति नाम्नावगच्छामः । सुमनस: प्रत्येक-दले दृश्यते कापि परमा स्पृहा, उच्चोत्कण्ठा, सजीवा-भीप्सा, विमलपवित्रता स्वर्गीयसौन्दर्यञ्च । विकसितकुसुमं दृष्ट्वानन्दाभिभूताः विस्मयस्तिमिता भवामः वयम्---किन्तु किमर्थम् ? यतो हि प्रसूनं धरित्र्यै रूपान्तरस्य जाज्वल्यमाना प्रतिश्रुतिः । ततो ननु कुसुमं सूक्ष्मनिर्मलानन्दस्य प्रेरिका सञ्जीवनसुधा । कुसुमानामाकृतयः वर्णवैचित्र्यस्य लालित्यञ्च अस्मानाकर्षन्ति---नयनानि शीतल-यन्ति च । तानि मुखरयन्ति कामपि मूकमुवासितां भाषाम्---विभवशालिसन्देशवाहकानि खलु तानि । स्मरणातिक्रान्तकालात् मानवाभीप्सायाः चिरन्तन-स्रोतांसि तानि ।

यथाङ्कुरोऽनागतभविष्यस्य प्रतिश्रुतिः तथा पुष्पं मूर्तिमत् वर्तमानस्य, तयोर्मध्ये कालस्य दीर्घव्यवधानम्---प्रथमस्तावत् मन्थरा दृष्टक्रिया-शीलतापरश्च दृष्टिगोचरीभूतः अन्यथा निर्जीवम्म-न्यायाः मृत्तिकायाः कथं जीवनस्य गौरवमङ्कुर्यते जडम्मन्या भूमिः कथं चैतन्यप्रसविनी माता भवितुमर्हति ? बीजमात्रे नवसर्जनस्य, आगामि वसन्तस्याभासः निलीनः । विकासात्पूर्वं कुत्र निहितास्ति पुष्पस्याकृतिः, लावण्यं सुरभिश्च । मृत्तिकावक्षसि निहिते बीजे को जानाति रूपमा-पद्यमानं वर्धमानं जीवनम् ? यदा जीवनं मूर्तिमद्रूपे-णाङ्कुर्यते वयं विस्मयस्तिमिताः भवामः । आपातदृष्टया धरित्रीमाता मलिना, निष्प्राणा, कीटकीर्णा चैतन्यहीना च प्रतीयते । निहितानि तत्त्वानि को द्रष्टुं शक्नोति ?–जीवनं, सौरभं, सौन्दर्यमाकृतिश्च–सर्वं, सर्वमेव वर्तते निर्जीवम्म-न्यभूम्याम् ।

सा एव धरणी माता या मनुष्याणां, सत्त्वाना-मुद्भिज्जगतश्च जननी–सैव स्ववात्सल्येन कुसुमानि जनयति, पोषयति लालयति च । यो वायुः अस्माकं प्राणसञ्चारी स एव पुष्पाणि हिन्दोलयति पोषयति च । समानमेव सूर्यकिरणानां नीचैः सर्वा सृष्टिः आनन्दकल्लोलं करोति ।

किन्तु यथार्थतः के स्मः 'वयम्' कानि च 'तानि'–एका खलु कृत्स्ना सृष्टिः–एकत्वं विभिन्न-तायां खण्डितं विभक्तञ्च–एकस्याः मातुः शिशवः सर्वे, समानमेव सत्त्वमस्माकं धमनीषु प्रवहति । तदा माता कथं चैतन्यहीना निर्जीवा भवितुमर्हति?

जीवममच्छेद्यमेकत्वं ननु । अनायासं कुसुमैःसहान्त-रसख्यं लभ्यम् । जीवनयात्रायां पुष्पाणि अभिन्नमित्राणि भवितुं शक्नुवन्ति । एवं स्थिते पार्थक्यं स्वतः एव शनैः शनैः वाष्परूपेणापगच्छति यतो हि तैः सह नीरवः विनिमयः वर्तते सर्वदा । तदा विश्वसामञ्ज-स्यच्छन्दः बोधगम्यं भवति । यदि अस्माकं भावना पुष्पाणां कृते शुभेच्छया प्रेम्णा च परिप्लुता सुर-भिता च स्यात् तदास्माभिः सह तेषां भावना-विनिमयः संजायते । वृक्षाः, पुष्पाणि–अखिल-प्रकृतिः–अनन्तायाः क्रोडे, छन्दसि, सामञ्जस्ये, सौन्दर्ये जाग्रत्क्रियाशीलतायाञ्च निवसन्ति,

सजीवप्रेम्णः अनन्तभाषायां नीरवतायामस्माभिः सह संवदन्ति च। तेषां मध्ये श्वसनमपि मूल्यवदुल्लासकरं, रमणीयं चेतनाविकासकारि च। तानि अस्मान् स्वनीरवैश्वर्येण परात्पर प्रति ग्रहणशीलतां निर्दिशन्ति।

कुसुमानि स्वानन्दाय, स्वात्माभिव्यक्तये विकसन्ति। तानि विगतातीतं भविष्यञ्च न परिचिन्तयन्ति। वर्तमानस्थानि स्वात्मन्येव सन्तृप्तानि। तत एव तेषां क्षणिकजीवनमपि आनन्त्यम्। जानन्ति तानि अनन्ततायाः क्रोडे स्थित्वा कथमनन्त-सौन्दर्यसुधास्वादितव्या कथञ्च सूर्यमयूखैः अभिषिक्तैः भाव्यम्। अनन्तवासः एव तेषां स्वभावः, तेषां धर्मः। निखिलविश्वेन सह कथमानन्दसमारोहे अंशभागिभिः भवितव्यमिति सम्यक् जानन्ति तानि यतो हि विश्वप्रकृतिः तेभ्यः अभिन्ना। पुष्पं पूर्णाभिव्यक्त्याः जडतायाः रूपान्तरस्य च मूर्तिमत् प्रतीकम्।

शुभ-श्रावणी-कामना

"श्रावणी नाम पर्वेदं रक्षाबन्धनसंज्ञकम्।
शुभं भूयाच्छुभं भूयात् सुहृदे भवते सदा ॥१॥
दीर्घायुष्ट्वंसुखायुष्ट्व मारोग्यं सुखसम्पदम्।
मन.प्रसादं भगवान् तुभ्यं देयान्निरन्तरम् ॥२॥

दिनानि रात्रयः सन्ध्याः मासाः संवत्सरास्तथा,
सुहृदो बान्धवाश्चैव स्वस्तये सन्तु ते सदा ॥३॥"

'सुस्वास्थ्यं पुरुषायुषं सफलतां विद्यां यशः प्राप्नुयाः,
सुस्निग्धाः शुभकामनाः, प्रियसुहृत्, तुभ्यं प्रयच्छाम्यहम्।

पर्वेदं शतशः प्रपश्यतु भवान् भूयाच्च सौभाग्यवान्,
मैत्री वृद्धिमवाप्नुयाच्च परमामेषा सदैवावयोः ॥४॥"

भावकः—जनमेजयः विद्यालंकार

वेदानाम् शाखाः (८)

प्रा. भद्रसेन, साधु आश्रम, होशियारपुर

अनेकशास्त्राणामध्ययनेनावगम्यते, यद् वेदानां ११३१ शाखाः सन्ति। यथा महाभाष्ये समायाति- एकविंशतिधा बह्वृच्यम्, एकशतमध्वर्युः, सहस्रवर्त्मा सामवेदः,नवधाऽथर्वणो वेदः। एवंव चर्चा महाभारत-पुराण-हृदय-प्रपञ्च-चरणव्यूह-दिव्यावदानादिग्रन्थेषु प्राप्यते। शाखाकाराणामृषीणाम् सामान्यपरिचयो महाभारत–निरुक्त–बृहद्देवता–पुराण–हृदयप्रपञ्च-प्रभृतिभिर्ग्रन्थैर्ज्ञायते।

क्वचित् शाखाशब्दो वेदशब्देनापिव्यवहृतः। यथा–आम्नायेभ्यः पुनर्वेदाः प्रसृताः सर्वतो मुखाः महा. शा. ३६६। आम्नायमार्षं पश्यामि यस्मिन् वेदाः प्रतिष्ठिताः महा. शा. २७४। आम्नायं = चरणम् यतो हि आर्षविशेषणम्, तेभ्यो वदीय-शाखानां प्रसवः। परमत्रत्वे शाखाचरणशब्दौ केषुचिद् ग्रन्थेषु समानार्थवाचकौ प्रयुज्येते। शाखा चरणस्यावान्तरविभागो यथा-अनुशाखा, अनुब्राह्मणम्। शाकल-बाष्कल, वाजसनेय-चरक इत्यादीनि चरणानि, एषां पुनः क्रमशः ५, ४, १५, १२ भेदाः सन्ति–भगवद्दत्तः।

शाखाशब्देन विविधो भावो गृह्यते। अत्र चत्वारः पक्षाः। केचन मध्यकालीनपरम्पराया विद्वांसः स्वीकुर्वन्ति, यत् शाखाः संहितावत् मूलवेदा एव, तासां पृथक्स्वतन्त्रसत्ताः अपौरुषेयाश्च ताः। अतस्तासां स्वानुयायिषु मूलवेदवत् प्रामाण्यं प्रचलति।

केचन! आधुनिकाः।– स्वतन्त्रसत्तावन्त्यः पाठभेदमय्यो मूलवेदरूपिण्यः एव शाखाः। एकस्या एव स्वमूलसंहितायाः भौगोलिकपरिस्थितिवशाद्-उत्पन्नानां पाठभेदानां संस्कराणि। अर्थाद् विभिन्न-प ठपरम्पराणां प्राचीननाम शाखेति।

अत्र शाखाशब्दस्य वृक्षशाखाशब्दाद् भिप्रायोऽ-र्थश्च यतो हि वृक्षे शाखातो भिन्नः शाखिन् (अवयवी) भवति। शाखाछिन्ने स तिष्ठति। परन्त्वात्र शाखाया भिन्नः शाखिन्, यत्तन्नष्टे चावशिष्यते। यथा शाकलाद् भिन्नो नान्यः ऋग्वेदः, स एव ऋग्वेदः।

वैदिककुलेषु पृथक् पृथक्रूपेण स्वतन्त्रतया स्वशाखाया एव मान्यता, नान्यासां प्रामाण्यम्। शाकल शाकलेष्वेव बाष्कलो बाष्कलेष्वेवनान्यत्र। परमत्रैका शंका जायते, यत् शाखाविवरणकाले चतुर्णामेव भेदाः कथमुच्यन्ते। पुनः कथं सर्वासां स्वतन्त्रसत्ता। साहित्ये च। मनु–शत–मुण्डकादिषु स्वतन्त्ररूपेण ऋग्वेद, यजुर्वेद, सामवेद इत्यादीनि वेदनामानि शाखानामरहितान्येव, प्राप्नुवन्ति तर्हि कथं शाकल एव ऋग्वेदो नान्यः कश्चित्।

तृतीयपक्षः–

शाखाः ऋग्वेदादिभ्यो भिन्नास्तदवयवरूपाः, काश्चन शाखाः संयुज्य चरणनाम्ना अभिधीयन्ते, यथा शाकल–बाष्कल–माध्यन्दिन–तैत्तिरीय इति। कानिचित् चरणानि संयुज्य वेदत्वेन व्यवह्रियन्ते अतः शाखा वेदावयवाः, यतो हि तासां वेदात् पृथक्स्थितिः, न तु शाखा एव वेदः।

क–ऋग्यजु. सामाथर्वणश्च चत्वारो वेदाः, सांगाः सशाखाश्च चत्वारः पादा भवन्ति। नृसिंह पुराण।

ख–ये तद् बृहज्जाबालं नित्यमधीते, स ऋचो-

ऽधीते, स यजूंषि—ऽधीते, स सामान्यधीते, सोऽथर्वणमधीते, सोऽङ्गिरसमधीते । स शाखामधीत, सकल्पानधीते—बृहज्जाबालोपनिषत् ।

चतुर्थपक्षः—सर्वाःशाखा वेदव्याख्यानानि सन्ति
क—सर्वास्ता हि चतुष्पदा, सर्वाश्चैकार्थवाचिकाः ।
पाठान्तरे पृथग् भूता वेदशाखा यथा तथा ॥
वायु पुराण ६१, ५६ ॥
ख—प्राजापत्या श्रुतिर्नित्या, तद् विकल्पाश्च इमे स्मृताः ॥ वा.पु. ६१, ७५ ॥
ग—तेन प्रोक्तम् पा ४, ३, १०१ सूत्रभाष्ये—न हि छन्दांसि क्रियन्ते, नित्यानि छन्दांसि । यद्यप्यर्थो नित्यो या तु—असौ वर्णानुपूर्वी सा अनित्या । तद् भेदाच्चैतद् भवति काठकं, कालापकम्, मौदकम्, पैप्पलादकम् । अत्र पतञ्जलिः पाठभेदादेव शाखाभेदं स्वीकरोति, पाठभेदश्च व्याख्यानार्थम् । तेन व्याख्यातम् तत् अध्यापितं वा प्रोक्तमिति उच्यते ।
घ—उपलब्धानां शाखानां तुलनात्मकाध्ययनेन इत्येव सिध्यति, यदिमाः शाखा वेद व्याख्यानरूपाः । तत्र बहुत्र वेदीयशब्दानामर्थो निर्दिष्टः ।

अस्मिन् पक्षे शङ्केयं जायते. यदि शाखा वेदानां व्याख्यानरूपाणि तर्हि आसु कश्चन नूतनो मन्त्रः कथं वर्तते । तथा वैदिकसाहित्ये । ब्राह्मणारण्यकादिषु । प्रतीकनियमो वर्तते, यत् स्वशाखाया उद्धरणप्रतीकत्वेन प्रदीयते, अन्यासां पूर्णो मन्त्रः प्रदीयते । "इमे मित्रे राष्ट्री—" ऐतरेये ब्राह्मणे प्रतीकत्वेन वर्तते । परम् मन्त्रोऽयम् अथर्ववेदे ४, १२ प्राप्यते । इन्द्रात् छन्दः प्रथमं—अयं मन्त्रः केवलं वाक्यपदीयस्य आगमकाण्डे प्राप्यते, नान्यत्र । अक्लुप्तशाखायाः स्यात् ?

मकरसंक्रान्ति-शुभ-कामना

संक्रान्तिर्मकराभिधा भवतु ते धन्या मनोहारिणी, सुस्निग्धाः शुभकामनाः, प्रिय सुहृत्, तुभ्यं प्रयच्छाम्यहम् ।
पर्वेदं शतशः प्रपश्यतु भवान्, भूयाच्च सौभाग्यवान्, मैत्रीवृद्धिमवाप्नुयाच्च परमामेषा सदैवावयोः ॥

सुस्वास्थ्यं पुरुषायुषं सफलतां विद्यां यशः प्राप्नुयाः, कान्तिं चन्द्रमसो लभस्व, लभतां सूर्यस्य तेजो भवान् ।
विश्वेशस्त्वयि तुष्यतु प्रतिदिनं, भूयाद् दयालुस्त्वयि, देयात् ते च, वयोऽधिकं, गजबलं, शार्दूलविक्रीडितम् ॥

भावक—जनमेजयः विद्यालंकारः

दिवंगतस्य मान्यस्य डा० अविनाशचन्द्रवसोः

पुण्यस्मरणम्


विनयावनतो धर्मदेवः (विद्यामार्तण्डः) देवमुनिर्वानप्रस्थः आनन्द, कुटीरम् ज्वालापुरम्

आसीद् यदीयं हृदयं पवित्रं, तथा चरित्रं व्यसनैर्विमुक्तम् ।
देवेशभक्तं विषयेष्वसक्तं, नौम्याप्तबन्धुमविनाशचन्द्रम् ॥
वेदेषु भक्तिः परमा यदोया, तेषां प्रसारे निरतोत्वजस्रम् ।
ग्रन्थान्लिलेखातिमनोरमान् यः,नौम्याप्तबन्धुं ह्यविनाशचन्द्रम ॥

यस्य स्वभावः सरलः सुशान्तो यस्मिन्न कोपो न मदो न लोभः ।
प्रेम्णा समस्तैः सह वतमानं, स्तौम्याप्तबन्धुं ह्यविनाशचन्द्रम् ॥
न वेदशास्त्राध्ययनादृते मे, साफल्यमवाप्स्यति जोवितं सत् ।
विचार्य वेदाध्ययने प्रवृत्तं, नमामि मान्यं ह्यविवाशचन्द्रम् ॥

अचिन्तयद्यो ह्यविनाशितत्वम्, आह्लादकारी च बभूव चन्द्रवत् ।
ज्ञानान्वितं निर्मलभक्तियोगिनं, नमामि मित्रं ह्यविनाशचन्द्रम् ॥
प्रयाणकाले मनसा च तेन, देवं स्मरन्तं ध्रुवशान्तिमूलम् ।
प्राणाँस्त्यजन्तं शुभयोगितुल्यं, नमामि मान्यं ह्यविनाशचन्द्रम् ॥

पुण्यात्मनः संस्मरणं समेषु, भक्तिं सुशान्तिं जनयेत् सदैव ।
सर्वे च वेदाध्ययने प्रवृत्ताः, देवेशभक्तौ निरतास्तथा स्युः ॥



"साहित्यं तत्, यद्बहुजन हिताय"

(डा० मञ्जुलमयङ्क पन्तुलः, वेदव्याकरणाध्यापकः, विश्व भारती, शान्ति निकेतनम्)

परिवेशपरिवर्त्तनात् वैचारिकी आस्था जागर्त्ति। कदाचित् परिवर्त्तते। मानव-चेतःसु जायमानमनुभूतिजन्यं तदेव परिवर्त्तनं साहित्ये प्रकाश्यते। अनुभूतीनां भिन्नत्वेऽपि स्वान्तः सुखाय वादिभिः आत्मानुभूतिरेव केवलं साहित्यसात्कृता। एवं सति अभिव्याहाररूपायाः वाचोऽवलम्बनात् "साहित्यं सापेक्षम्" इति तेषामेवाचारव्यवहारप्रक्रियया जनानुरोधि साहित्यमित्यस्माकमेव मतं पर्यायेण अनुमोद्यते। अद्यत्वे जीवनायामेषु महतः परिवर्त्तनात्, रूढ्या समायातायाः साहित्यकमान्यतायाः स्वभावतो निरासः समापतितः संस्कृतसाहित्यस्य यावत्कृति प्रमाणं यदस्याः भाषायाः समुपलभ्यमानं साहित्यं संप्रदायानुमते एव वर्णने प्रवणम्, यत्र राजानो नायिकाश्च प्राथम्ये भेजिरे।

संस्कृतसाहित्यस्येदृशं समष्टिचिन्तारहितं लोकानुरागवैरस्यं मुष्टिमितान् कांश्चित् संस्कार कर्दमितान् एव जनान् तोषयितुं प्रभवेत्। विचारोपक्रमोऽप्यत्र तावद्युज्यते यद्राजाश्रये पल्लवितं साहित्यं जनतन्त्रेऽपि कथम् उपयुक्तम्? यतो हि रूढे साहित्ये क्वाचित्केनैवोपलभ्यमानस्य लोकानुरागशब्दस्य यावद्भिः प्रयोगैः जगत्प्रवृत्तिरेव केवलं वारिता दृश्यते। एतादृशे च साहित्ये जगत्प्रवृत्तिव्यावर्त्तिकी प्रेरणारूपा या प्रवर्त्तना सैव तत्र लोकानुरागः। किन्तु जगत्प्रवृत्तेरसत्तया विरचितमखिलमपि साहित्यं लौकिकमसत् विरच्यमानात् विरचितात् वा साहित्याभिधविशेषणात् अतिरिच्यते! तल्लोकजीवनस्य वास्तवे चित्रणे अनुरक्तानां लोकानुरागरसिकानां मते लोकजीवनविमुखं साहित्यं लोकानुपयोगितया केवलं साहित्याभिधमेव।

उपरिष्टात् कीर्त्तितस्य संप्रदायानुमोदितवर्णनस्य अवास्तवमेकेनातिलघुनोदाहरणेन स्पष्टयितुं क्रमामहे। संस्कृतसाहित्यसंप्रदाये योषितामास्यमद्यैः बकुलविकासस्य मनोहारिणी मान्यता सर्वेषां सुविदिता। किन्तु सत्योन्मेषधिया अस्मत्साहित्यिकाः वदेयुः किमस्यामुक्तौ दृश्यते काचन व्यावहारिकता? धर्मप्राणानां संस्कृतोपासकानां मध्ये तथा आस्थापि न दृश्यते। तथापि साहित्यनाम्नि योषितामास्यमद्यमद्यावधि तदैव स्थानं लभमानमास्ते। मन्ये ईदृश्या परोक्षमद्योपासनया अस्मत्साहित्यिकाः तथा मदोन्मत्ताः जाताः यथा वास्तविकी साहित्य धीर्विलुप्ता। लोकसुखदुखानुभूतिशून्यमपि संस्कृतसाहित्यं सर्ववरीयः, अन्यदीयानि रुचिराण्यपि साहित्यानि हेयानीत्यपलाप एव।

किन्तु बभूवुः केचन स्वनामधन्याः कविपुङ्गवाः यैः सत्यं शिवीकृत्य संस्कृत साहित्यमुदात्तीकृतम्। तैश्च, अतीतानागतवर्त्तमानप्रसरधिया त्रिष्वपि कालेषु वित्तगतमाभिजात्यं लक्षितम्। भारतमपि अस्याः सार्वभौमरूढेः न कदापि अपवादो बभूव। विद्याभूषिता अपि वित्तहीनाः विद्वांसः अतीते तथैव समादरं न लेभिरे यथा वर्त्मनि। अस्य सत्यस्य धाष्ट्र्यम्, वाग्विलासिनः वाचि सगर्जनमुन्मुक्तगिरावातरत् :—

"सर्वे गुणाः काञ्चनमाश्रयन्ति।"

न चेयमुक्तिः अर्थप्रशंसापरा अपितु विद्यावित्तयोः अक्रमे व्यतिहारे कवेरसहायो निःश्वासः।

इतोऽपि मार्मिकी लोकानुभूतिः शिशौ शवोपलब्धिः,१ या च अस्य देशस्य उग्रतममार्थिकवैवम्यमाविष्करोति । रिक्ताःभारतभक्ताश्च किमस्मानवबोधयितुं क्षमाः यत्कैः दोषैः अस्य सरस्वतीभक्तस्य शिशवः शवा इव अजायन्त ? अन्येन तु वस्त्राभावे पिता महार्घरूपभुक्तयौवनः पितुरंगभूषणं पट.२ पुष्पवतेव धार्यते । काचन गृहिणी पथि गच्छतो लाजाविक्रेतुः मुखात् "लाजा" इति शब्दं श्रुत्वा झटिति शिशोः कर्णौ अपि दधाति३ । सत्यं, क्रयशक्तिहीनायाः मातुरेष एव सुलभः पन्थाः ।

वृत्तिरहितोऽपरः कश्चित् वृत्तिसन्धाने गतोऽपि अनासादितवृत्तिः (यथा युवानः अद्यापि न लभन्ते) नैराश्यवृतः गृहासन्नो यदा गृहिण्याः "पितरि आगते वस्त्रालंकारदानाश्वासनं" श्रुतं तदा निःश्वस्य गृहमप्रविश्यैव पुनस्तदैव सास्रं प्रस्थितवान्४ ।

दारिद्र्योपहतयोः कयोश्चित् दम्पत्योः दुर्दशया द्रवितः चोरोऽपि अश्रूणि विमुञ्चति५ ।

पृथिव्या अन्यतरस्मिन्नपि भूखण्डे मुसलीव मूषक, मूषीव मार्जारिका, मार्जारीव शुनी अन्वेषणादपि न लप्स्यते कश्चित् । किन्तु दारिद्र्योपहतस्य गृहे विचित्रेयं जन्तुशाला६ अनायासं लब्धुं शक्यते । सर्वतो विचित्रो जन्तुः गेहिनः सा गृहिणी या गृहमुच्यते, दैन्यजर्जरिता सती शुनीत्वमाप्नोति । गेहिनो वृष्टिजन्या दुर्दशा तु असामाजिकमपि जनं द्रावयेत्७ । एतादृशीषु रचनासु, भारतीयं जनदैन्यं भूतवर्त्तमानयोः समानमेव लक्ष्यते । तथापि संस्कृतसाहित्यिकैः अव्यावहारिकी तिरस्कृता च कल्पना चिरात् मूर्त्तिमती क्रियते । अतएव संस्कृतसाहित्यस्य समुन्नतिर्घ षस्तावत्सार्थकतान्नावहति, यावल्लोकानुरागप्रेरितं वास्तवं सुखदुःखजन्यं भावविह्वलत्वमत्र समष्ट्यै न प्रकाश्यते ।

१· क्षुत्क्षामाः शिशवः शवा इव भृशं मन्दाशया बान्धवाः, लिप्ता जर्जरकर्करी जतुलवैर्नो मां तथा बाधते । गोहिन्या त्रुटितांशुकं घटयितुं कृत्वा स काकुस्मितं, कुप्यन्ती प्रतिवेशिलोकगृहिणी सूचीं यथा याचिता ।

२. अयं पटो मे पितुरंगभूषणं पितामहार्घरूपभुक्तयौवनः । अलंकरिष्यत्यथ पुत्रपौत्रकान् मयाऽधुना पुष्पवतेव धार्यते ।।

३. अये ! लाजानुच्चैः पथि वचनमाकर्ण्य गृहिणी, शिशोः कर्णौ यत्नात्सुपिहितवती दीनवदना

४. मा रोदीश्चिरमेहि वस्त्ररहितान् दृष्ट्वाद्य बालानायातस्तव वत्स दास्यति पिता ग्रैवेयकं वाससी । श्रुत्वैवं गृहिणीवचांसि निकटे कुड्यस्य निष्कंचनो निःश्वस्याश्रुजलप्लवप्लुतमुखः पान्थः पुनः प्रस्थितः ।।

५. कन्थाखण्डमिदं प्रयच्छ यदि वा स्वाङ्के गृहाणार्भकम्, रिक्तं भूतलमत्र नाथ ! भवतः पृष्ठे पलालोच्चयः । दम्पत्योरिति जल्पतोर्निशि यदा चोरः प्रविष्टस्तदा, लब्धं कर्पटमन्यतस्तदुपरि क्षिप्त्वा रुदन्निर्गतः ।।

६. मद्गेहे मुसलीव मूषकवधूर्मूषीव मार्जारिका, मार्जारीव शुनी शुनीव गृहिणी वाच्यः कमन्यो जनः । इत्यापन्नशिशूनसून्विजहतो दृष्ट्वा तु झिल्लीरवैर्लूना तन्तुवितानसंवृतमुखी चल्ली चिरं रोदिति ।

७· पीठाः कच्छपवत्तरन्ति सलिले संमार्जनी मीनवत्, दर्वी सर्पविचेष्टितानि कुरुते संत्रासयन्ती शिशून् । शूर्पाधर्वातमस्तका च गृहिणी, भित्तिः प्रपातोन्मुखी, रात्रौ पूर्णतडागसन्निभमभूद्राजन्मदीयं गृहम् ।।

महाकविश्रीभारविगौरवम्

डा० अमरनाथपाण्डेयः, संस्कृतविभागाध्यक्षः, काशीविद्यापीठम्, वाराणसी

वन्दे किरातं निगमान्तवेद्यं वन्दे कविं तस्य च काव्यसिद्ध्यै ।
आनन्दसन्दोहमनल्पबोधं ददाति चित्ते स्फुरितं मदीये ॥
शैली नवा कापि समर्चिता यैर्लोकप्रसङ्गो ग्रथितो नवीनः ।
स्रष्टुर्विधानं विवृतं समृद्धं ते पूजनीया विबुधैः कवीशाः ॥
शब्दार्थसम्बन्धमलं सृजद्भिश्शब्देन भावानधिकान् किरद्भिः ।
चित्रं लिखद्भिः सकलं च सद्भिः काचित् सुधार्द्रा कथिता कथालिः।
वनस्थली कर्षति कान्तिभिर्यं हरन्ति वृक्षा लतिकाः खगाश्च ।
प्रीणन्ति शैला यमुदात्तशृङ्गैः सोऽयं कविर्भारविरध्वगाग्रः ॥
दिव्येऽवदाते महिते प्रसङ्गे पात्रे सदा यस्य मनोऽनुरक्तम् ।
आनर्च वृत्तैर्नितरां पवित्रैः शिवं विभाव्योऽविरतं कृती सः ॥
यस्य प्रभावं नहि गातुमीशा अस्या धरित्र्या मुनयः कवीशाः ।
तस्य क्रियाकौतुकमुल्लिखन्तं नैसर्गिकं भारविमानतोऽस्मि ॥
शृङ्गारलासं चरितप्रकाशं सौन्दर्यभासं कवितालिरासम् ।
अलङ्कृतीनां च नवैर्विधानैर्जग्रन्थ काव्यं नयपूतपृष्ठम् ॥
क्लिष्टं च काव्यं निरसं प्रणीतं न रोचते तद्रसिकाय सम्यक् ।
वैरस्यमापादयति प्रतीते चित्ते कवौ दोषफलं गिरामः ॥
क्वचित् पुराणं प्रकृतिप्रबन्धं काव्ये स्वकीये प्रततान मिथ्या ।
नवार्थराहित्यगतच्छवौ किं रज्यन्ति चेतांसि समाहितानाम् ॥
पूर्वं यमर्थं रुचिरं जगाहे पुनस्तमर्थं प्रतिपादयन् सः ।
दोषं समालिङ्गति नूनमस्मान् निभालयन्तु प्रतिभापरीताः ॥
काव्येऽनपेक्षितं बध्नन् विस्तरं विहृतं क्वचित् ।
वैदुषीख्यापने सक्तो मार्गं नानुससार सः ॥

किरातार्जुनयोर्युद्धं नौचित्येन बबन्ध सः ।
शिवेन त्वर्जुनस्येदं नातिशय्यमपेक्षते ॥
सदर्थाः स्वीकृताः सत्यं गुरुत्वं तत्र पूजितम् ।
क्वचिच्छ्लोके सदाराध्ये जगुः सन्दर्भराशयः ॥
जीवनस्य च सङ्कल्पा विशुद्धा देशना तथा ।
विभिन्ना वृत्तयो नृणामजस्रं सन्निरूपिताः ॥
राजनीतेस्तु वैशिष्ट्यं सोल्लासं कविना हितम् ।
तत्र नैकप्रतानानां विकल्पा रचितास्तथा ॥

श्लोकैश्श्लिष्टैश्च चित्रैश्च दुनोति रसिकान् भृशम् ।
[कृत्रिमैर्वचनैर्बद्धं काव्यं फल्गवभिधीयते ॥

वैदिक-साहित्य-सौदामिनी

श्री वागीश्वरो विद्यालंकारः साहित्याचार्यः

यथा वा--

अनेजदेकं मनसो जवीयो नैनद् देवा,
आप्नुवन् पूर्वमर्षत् ।
तद् धावतोऽन्यानत्येति तिष्ठत्,
तस्मिन्नपो मातरिश्वा दधाति ।।

यजु० अ० ४०,म० ४ ।

मन्त्रेऽस्मिन् परमात्मतत्त्वं निरूप्यते । एकम् अद्वितीयम् स्वसदृशद्वितीयरहितम् केवलमित्यर्थः । 'एक संख्यान्तरे श्रेष्ठे केवलेतरयोरपि ।' इति-मेदिनी । अनेजत् अचलम् । एजृगतौ कंपने चेति धातोः शतरिरूपम् । मनो हि जवनं तत् ततोऽपि जवनतरम् इति जवीयः । जवशब्दादियसुनि साधु । देवामनश्चक्षु प्रभृतय , पूर्वं प्रागेव अर्षत्-गतं तत् न आप्नुवन् प्राप्तुं ज्ञातुं न शक्नुवन्ति । अतिसूक्ष्मत्वात्तस्य । तिष्ठदपि तद् अन्यान् मनःप्रभृतीन् देवान् धावतोऽपि अत्येति अतिक्रम्य गच्छति । प्रलयानन्तरं निरुपाधिकं ब्रह्मरूपम् अपहाय जगत्-सिसृक्षया सगुणत्वमापन्ने सति तस्मिन् जायमानेषु च जीवेषु मातरिश्वा प्राणवायु. जीवेषु अपः कर्मशक्ति दधाति । अथवा पूर्वकल्पकृतमदृष्टरूपेण अवस्थित जीवाना शुभाशुभकर्मजात सक्रिय करोति ।

यदेव अनेजत् तदेव जवीय इति परस्पर-विरुद्धयोर्गुणयोर्धर्मयोर्वा एकाधिकरण्याऽसंभवाद् विरोधः । धावनक्रियाऽभावेऽपि धावतोऽन्यान् अत्येतीति कथनाद् हेतुं विनाऽपि कार्योत्पत्तिरूपा विभावना । जववत्सु सर्वेषु तस्य जविष्ठत्वाद् व्यतिरेकः । एभिः स्वतः संभविभिरलङ्कारैर्भगवतो महिमातिशयरूपं वस्तु व्यज्यते । ननु "अनेजदेकं मनसो जवीय." इत्यत्रापि "अमितः समितः प्राप्तै" रित्यत्रेव कुतो न विरोधाऽऽभासध्वनि., विरोध-सूचकानाम् अपि प्रभृतिपदानामप्रयोगादिति चेत्, अङ्ग उभयथाऽपि लक्ष्येऽलङ्काराद्वस्तु ध्वनित्वमक्षतम् । अलङ्कारस्य (विरोधस्य) व्यङ्ग्यतायामपि तस्य तत्राऽनपायात् (विरोधताऽनपायात्) ।

अपि च--

निर्वै क्षत्रं नयति, हन्ति वर्चो,
ऽग्निरिवाऽऽरब्धोविदुनोति सर्वम् ।
यो ब्राह्मणं मन्यते अन्नमेव,
स विषस्य पिबति तैमातस्य ।।

अथर्व० ५।१८।४।

अत्याचरितस्तपस्वी ब्राह्मणः क्षत्रम् अपकारिणं शासकम् निर्णयति नि शेषता नयति । अस्य पुत्रपौत्रराज्यादिकं विदुनोति उपतापयति भस्मसात्करोति । अस्य वर्चो हन्ति । आरब्धोऽग्निरिव अत्याचारिणः शासकस्य सर्वमेव नाशयतीत्याशयः । यो हि ब्राह्मणं ब्रह्मविदं तपस्विनं तस्य धनादिकं वा अन्नमेव स्वोपभोग्यमेव मन्यते स तैमातस्य विषस्य पिबति स सर्वविषमेव पिबति । कर्मणि षष्ठी । इह ब्राह्मणस्य अन्नेन अभेदाध्यवसानाद् अतिशयोक्तिः । सा च-ब्राह्मणसर्वस्वहरणं सर्पविषपानमिवेति बिम्बप्रतिबिम्बभावाऽवबोधनरूपाम् निदर्शनामुत्थापयति । संभवन् वस्तुसंबन्धोऽसम्भवन् वापि कुत्रचित् । यत्र बिम्बानुबिम्बत्वं बोधयेत्सा निदर्शना ।। (साहित्यद० १० कारि.) साम्ये हि प्रणिधानगम्ये सप्रयत्नचिन्तनवेद्ये सति बिम्बप्रतिबिम्बभावः । अत्र निदर्शनाऽलङ्कारेण अत्याचारिणः शासकस्याऽवसानं घोरयातनाभि-

पृथग्भावं पश्यति। अत्र सूर्येन्दू एव विलोचने यस्येति द्यावापृथिवीरूपम् अद्भुतं मण्डलद्वयमेव चक्रवाकयुगलमिति च रूपक्। तथापि कविप्रौढोक्तिसिद्धं पौराणिककल्पनाप्रसूतं वा सूर्यचन्द्रयो र्भगवतो नेत्ररूपेण वर्णनात्मकं वस्तुमुख्यं चमत्कारकारणम्। तेन च पर्यायेण गच्छतोरागच्छतोश्च रात्रिदिवसरूपयोर्वस्तुनो र्व्यञ्जनाद् वस्तुध्वनिः।

तथा—

सुविज्ञानं चिकितुषे जनाय सच्चा-
ऽसच्च वचसी पस्पृधाते।
तयोर्यत् सत्यं यतरद् ऋजीय-
स्तदित् सोमोऽवति हन्त्यासत्॥

ऋ० ७।१०४।१२।

देवता-इन्द्रः। ऋषिः-मैत्रावरुणिर्वसिष्ठः। सुविज्ञानं चिकितुषे-सम्यग् ज्ञानं जिज्ञासमानाय जनाय। जनमनुकूलयितुमित्यर्थः सद् असच्च वचसी तथ्यमिथ्यावचने पस्पृधाते तस्य बुद्धौ संघर्षमिव समाचरतः। अयं जिज्ञासुर्मामेव सत्यत्वेन स्वीकरोत्विति प्रयतेते। तयोर्मध्येयत् सत्यं यथार्थं तदित् तदेव सोमोऽवति सद्वृत्तिर्जनो गृह्णाति। किं लक्षणं सत्यस्य? ऋजुत्वमेव। यतरत् ऋजीयः सरलतरं तदेव सत्यम्। द्वयोर्बिन्द्वोर्मध्ये सरला रेखा एकैव कुटिलास्तु बह्व्यः। अथवा सोमः उमया सह वर्तमानः। उमा[1] यथार्थज्ञानम्। लोके हि द्विविधाः पुरुषाः दृश्यन्ते। एके येषां सत्यं प्रति स्वाभाविकी प्रवृत्तिः। अपरे च निसर्गेण असत्योन्मुखाः। सत्यं जानन्तोऽपि ते प्रकृतिवशंवदा असत्यं स्वीकुर्वन्ति च्यवन्ते च श्रेयसः। सत्याऽसत्ययोर्वचसोश्चेतनमानवयोरिव संघर्षो न संभवति, तेन मुख्यार्थबाधेऽपि तद्वर्णनं कविप्रौढोक्तिमात्र सिद्धं वस्तु। तेन चान्ते सत्यं न एव कल्याणं भवतीति वस्तु व्यज्यते।

अथाऽर्थशक्त्युद्भवध्वनेः **षष्ठो**भेदः कवि प्रौढोक्तिसिद्धाद् वस्तुनोऽलङ्कारध्वनिस्वरूपः—

यथा—

रजनीषु विमलभानोः करजालेन प्रकाशितं वीर धवलयति भुवनमण्डलमखिलं तव कीर्तिसंततिः सततम्॥ **साहित्यद०, परि० ४,**

अत्र कविप्रौढोक्तिमात्रसिद्धेन कीर्तिसंतत्या भुवनमण्डलधवलीकरणरूपेण वस्तुना तस्याश्चन्द्रकरजालाद् उत्कर्षव्यञ्जनाद् व्यतिरेकालङ्कारस्यध्वनिः।

यथा वा—

किं पुण्यमाचरितमेभिरहो महीयः
स्वप्राग्भवेषु कृतिभिर्नु महानुभावैः।
आचामतीह गुरुसूनु हकीकतावीर्य-
वशीतलोज्ज्वलयशोऽमलचित्तमेषाम्॥१६॥

(इदं पद्य मदीयम्)

धर्मरक्षार्थं स्वजीवनं समर्पितवता जनानां सुचरित्रअग्रगण्यसनिभिर्महानुभावैः स्वपूर्वजन्मसु किं नाम पुण्यमाचरितं यत् फलभूतमेषां चित्तैरिह जन्मनि सुगृहीतनामधेयानां श्री गुरुगोविन्दसिंहतनयद्वयबालकहकीकतरायप्रभृतीनां शीतलं धवलं च यशः कर्णेहत्य निपीयते? इह यशसः शीतलत्वं धवलत्वं च कवि प्रौढोक्तिमात्रसिद्धम्, तेन च श्रोतॄणां चेतसश्चकोरत्वव्यञ्जनादुपमाया रूपकस्य वालङ्कारस्य ध्वनिः। वेदेऽपि—

वि मे कर्णा पतयतो विचक्षु,
र्वीदं ज्योतिर्हृदय आहितं यत्।
वि मे मनश्चरति दूर आधीः,
किंस्विद् वक्ष्यामि, किमु नू मनिष्ये॥

ऋ० ६।९।६

---

१. विद्या उमारूपिणी प्रादुरभूत् स्त्रीरूपा। स इन्द्रस्तामुमां बहुशोभमानां सर्वेषां हि शोभमानानां शोभनतया विद्या। इति केनोपनिषद्भाष्येश्रीशंकराचार्याः।

देवता—वैश्वानरोऽग्निः । ऋषिः-बार्हस्पत्योभरद्वाजः । छन्दः-त्रिष्टुप् ।

हे वैश्वानरदेव तव महिमानम् आकर्णयितुं मम कर्णा-कर्णौ विपतयतः विविधादिशो धावतः । तव महिमानं दिदृक्षमाणस्य मम चक्षु विपतयति विविधान् पदार्थान् प्रति धावति । हृदये आहित स्थापितम् यदिदं बुद्धिरूपं ज्योतिस्तदपि विपतयति, कीदृक् तव स्वरूपमिति निरूपयितुं विविधं चेष्टते । दूरे आधी सुदूरवर्तिषु अतीन्द्रियेष्वपि पदार्थेषु आधानं यस्य, तन्मदीयमिदं मनोऽपि विचरति विरुद्धासु दिक्षु संचारमाचरति । एवं बुद्धिमन-सहितेषु सर्वेन्द्रियेषु प्रयतमानेष्वपि तव याथार्थ्यमहं नावगच्छामि । इति सति हेतौफलाऽभावरूपा विशेषोक्तिः । एवं विमूढमतिरहं किं स्विद् वक्ष्यामि ? दूरे तावद् वचनम् किं मनिष्ये किं चिन्तयेयम् इत्येव न निश्चिनोमि । कर्णचक्षुरादीनां चेतनवत् स्वत इतस्ततो धावनमनुपपन्नं कविप्रौढोक्तिमात्रसिद्धं वस्तु । तेन च सति हेतौ फलाऽभावरूपाया विशेषोक्तेर्व्यञ्जनाद् इह वस्तुनोऽलंकारध्वनिः । चुरादिगणस्थ पतगतौ धातुः 'वाणिजन्त ।' इति गणसूत्रेण विकल्पात् पातयति पतयतीतिचेति रूपद्वयम् । मन्त्रे विषयं बुद्धिं निगीर्य तस्य विषयिणा ज्योतिषाऽभेदाऽध्यवसानादतिशयोक्तिः । सूर्यचन्द्रादिबाह्यज्योतिषा निरासाय उक्त हृदय आहितमिति ।

अथ अर्थशक्त्युद्भवध्वनेः सप्तमो भेदः कविप्रौढोक्तिसिद्धादलङ्काराद् वस्तुध्वनिरूपः—

यथा—

दशाननकिरीटेभ्यस्तत्क्षणं राक्षसश्रियः ।
मणिव्याजेन पर्यस्ताः पृथिव्यामश्रुबिन्दवः ॥

रघु०, स० १०, प०

अत्र कविप्रौढोक्तिसिद्धेन अर्थोदयया श्रीराम जन्मक्षणे लङ्कायां रावणमुकुटस्य न मणयः प्रत्युत तद्व्याजेन राक्षसश्रियोऽश्रुबिन्दवः पृथिव्यां पतिताः) इत्यपह्नुत्यलङ्कारेण भविष्यद् राक्षसलक्ष्मीविनाशरूपं वस्तु व्यज्यते । साहित्य०, परि०४, अमूर्तायाः राक्षसश्रियोऽश्रुपतनाऽसंभवात् तद्वर्णनं कविप्रौढोक्तिमात्रसिद्धम् । लोके देवतानामश्रुपातादिकममङ्गलसूचकं मन्यते ।

तथा—

एकाऽऽनने सुचतुरस्य विलोक्य यस्य
साङ्गान् मुखं निवसतश्चतुरोऽपि वेदान् ।
गर्वं व्यमुञ्चदचिराच्चतुराननः स
तानुद्वहन् कथमपि स्वमुखैश्चतुर्भिः॥२०॥

चतुर्भिर्मुखैरेकैकशश्चतुरो वेदान्, कथमपि न तु सुखेनेत्यर्थः, वहन् ब्रह्मा महर्षेर्दयानन्दस्य एकस्मिन्मुखे साङ्गान् चतुरो वेदान् सुखपूर्वकं निवसतः पश्यन् पाण्डित्यगर्वं व्यमुञ्चदिति कविप्रौढोक्तिमात्रसिद्धेन व्यतिरेकालङ्कारेण महर्षेः पुरस्तादितरेषां विदुषां तु कथैव केति वस्तु व्यज्यते ।

यथावा—

राजन् पर्वत मूषिकः स कियती मात्राऽग्रतो मे तमाऽऽनेष्याम्यत्र नियम्य राजसदसीत्थं कत्थमाना भटाः- दिल्लीशस्य निदेशतः परवशा यान्तो दिशं दक्षिणां, तूष्णीमेवनिवेदयन्त्यभिजनायाऽन्त्यं प्रणामाञ्जलिम्॥

इदं पद्यं मम । ॥२१॥

दिल्लीपतेः समक्ष राजसभासु 'शिवाजी तु पर्वतमूषिकमात्रः।' इति कथनेन विकत्थमाना अपि तस्य सेनापतयो भयातिशयात्तां दक्षिणां दिशंसिंहाक्रान्तां विभावयन्तो युद्धाय तत्र गन्तुं नेच्छन्ति, तथाऽपि राजाज्ञया गच्छन्तस्ते तत्रैव स्वावसानं निश्चितं मन्यन्ते इति तथ्यम् अभिजनाय अन्तिमप्रणामाञ्जलिनिवेदनद्वारा भङ्ग्यन्तरेण वर्णितमिति पर्यायोक्तालङ्कारः । तेन च तेषामनिष्टाऽऽशङ्कया तत्परिवारजनानां करुणक्रन्दनादयोऽनुभावा वस्तुरूपा व्यज्यन्ते । पर्यायोक्तं यदा-

देवता—वरुणः । ऋषिः-वसिष्ठः । छन्दः-त्रिष्टुप् । आयद्रुहावेति—यद् यदा देवो वरुण अहं च सख्य-भावरूपाँ नावम् आरुहाव । यद् यदा तां नावं समुद्रं मध्यं समुद्रस्य मध्यभागं प्रति प्रेरयाव । भगवता सह सख्यभावजन्यानामानन्दानां पराकाष्ठा हि समुद्रस्य मध्य भाग । तामारुह्य यदा आवाम् अयाम तेषामानन्दरूपजलानाम् अधि उपरि + स्नुभिः तत्रत्यतरङ्गाग्रशिखरैः सह पर्यायेण उपरि अधश्च अचराव तदा शुभे शोभने प्रेङ्खे प्रेङ्खोलिकायाम्-(लोके झूलाहिंडोला इति) प्रेङ्खयावहै दोलायाम् आन्दोलनानन्दम् अविन्दावहि स्नु. । प्रस्थः सानुरस्त्रियाम् । इत्यमर'' स्नुपदमिह आनन्द-तरङ्गशिखराभिप्रापकम् ।

मन्त्रेऽस्मिन् प्रस्तुतं भक्तभगवतोः सख्यभाव विषयं निगीर्य तस्य अप्रस्तुतेन विषयिणा नावा, तथा जीवन्मुक्तिदशायाम् अनुभूयमानस्य सख्य-भावजन्यस्य परमानन्दस्य च समुद्रेण अभेदा-ऽध्यवसानादतिशयोक्तिः । तया च ब्रह्मानन्दात्मकै-स्तरङ्गशिखरैः सह नावः = सख्यभावनासिक्त-चित्तवृत्तेः ऊर्ध्वाधोगमनम् प्रेङ्खायां प्रेङ्खोलनम् इति तयोः बिम्बप्रतिबिम्बभावबोधनात् निदर्श-नाऽलंकारो व्यज्यते (संभवन् वस्तुसम्बन्धोऽसंभवन् वापिकुत्रचित् । यत्रबिम्बानुबिम्बत्वं बोधयेत्सा निदर्शना ।। इति तल्लक्षणात् ।) अस्य सख्यभावस्य स्पष्टनिर्देशः पञ्चममन्त्रे "क्व त्यानि नौ सख्या बभूवु. सचावहै यदवृकं पुराचित्० ।। ऋ. ७।८८।५। मन्त्रेषु द्रष्टव्यः । अपि च—

यदिमा वाजयन्नहमोषधीर्हस्त आदधे ।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ।।

यजु० १२।८५।

देवता—वैद्यः । ऋषिः-भिषक् । छन्दः-अनुष्टुप् । यदिमा०—वाजयन् रोगिणः, रोगस्य च प्रकृतिं, तन्निदानं, चिकित्साम् ओषधीनां गुणधर्मादिकं च सम्यग् जानन् अहं वैद्यः, यद् यदैव इमा ओषधीः रोगिणे दातुं हस्त आददे गृह्णामि तदैव तद्ग्रहण-समकालमेवेत्यर्थः । यक्ष्मस्य रोगस्य आत्मा तथा नश्यति यथा जीवगृभः वधस्थानं प्रति नीयमानस्य पशोर्मृगिवस्य वा आत्मा जीवनं. वधात् प्रागेव नश्यति "क्षेत्रज्ञ आत्मा पुरुषः ।" इत्यमर. । स हि भयातिशयात् आत्मानंमृतमेव मनुते । "जीवमेव यो हिंसार्थं गृह्यते आघातस्थानं नीयते स जीवगृप् । तस्येति ।" यजुर्वेदभाष्ये श्रीमहीधर. । "हृग्रहोर्भ-श्छन्दसि" इत्यनेन हस्य भत्वम् । ओषधिप्रयोगात् प्रागेव रोगनाशवर्णनात् कारणात् प्राक् कार्योत्पत्ति-रूपाऽतिशयोक्तिः । "भेदेऽप्यभेदः, सम्बन्धेऽसम्बन्ध-स्तद् विपर्ययौ । पौर्वापर्यात्ययः कार्यहेत्वोः सा पंचधा ततः ।" साहित्यद० परि १०, कारि० ४७ । सा च ओषधिं विनाऽपि रोगनाशवर्णनात् हेतुं विना कार्योत्पत्तिरूपा विभावनां व्यनक्ति । इति कवि प्रौढोक्तिसिद्धाद् व्यंजकाद् अतिशयोक्त्यलङ्कारात् अलंकार ध्वनिः । नाशो देहस्यैव न नित्यस्या-ऽऽत्मनः आत्मा च देहदेहिभावसम्बन्धेन भौतिके देहे निवसति, न तु वातपित्तादिधातुवैषम्यरूपे रोगे । तथापि यक्ष्मस्य आत्मनो विनाश इति वचनेन रोगस्य मूलतो विनाशो व्यज्यते । ओषधि-प्रदानात् प्रागेव रोगोपशमकथनेन वैद्यस्य कुशलता रोगिण आश्वास. स्वजनानां विश्वासातिशयश्च व्यङ्ग्य. । एवमत्र 'वस्तुव्यंजनापि' दृश्यते ।

अस्मिन् अर्थशक्त्युद्भवध्वनिप्रसङ्गे श्रीरस-गङ्गाधरकारा. "प्रतिभानिर्वर्तितत्वाऽविशेषाच्च कवितदुम्भितवक्तृप्रौढोक्तिनिष्पन्नयोः (कवि कविनिबद्धवक्तृप्रौढोक्तिनिष्पन्नयोः) अर्थयोर्न-पृथग्भावेन गणनोचिता । उम्भितोम्भितादेरपि भेदान्तरप्रयोजकतापत्तेः । " इति प्रतिपादयन्तो यत् कविनिबद्धवक्तृप्रौढोक्तिसिद्धस्य ध्वनेश्चतुरोभेदान् नाऽभिनन्दन्ति तन्न रुचिरम् । कवि प्रौढोक्ति सिद्ध-भेदेभ्यःकविनिबद्धवक्तृप्रौढोक्तिसिद्धभेदेषु स्पष्टमेव पृथग्विध सौन्दर्यदर्शनात् ।

तथा हि--

हल्दीघाटी हृदयनिहितां धूलि मद्यापि यत्नाद्
रक्तां रक्तैरवति समरे दत्तदेहाहुतीनाम् ।
यत् पौलोमी तिलककरणायाऽङ्गरागाय चाऽन्ये
पुण्यामेनां दिविदिविषदो दुर्लभां कामयन्ते ।।२३।।

पद्यमिद मदीयम् ।

दिल्लीपतिसम्राट् सैन्यै सह समरे समर्पित-जीवनानां राजपुत्राणां शोणितेन शोणवर्णां धूलि हल्दीघाटी स्वहृदये निगृह्य अद्यापि यत्नाद् रक्षति । तत्र हेतुमाह—यत् ! स्वभाले तिलकरचनार्थं शची, निजदेहेऽङ्गरागाय चेतरे देवराजादय पावनीमिमा स्वर्गे दुर्लभां मन्यमाना जिहीर्षन्ति ।

तथा—ममैव द्वितीय पद्यम्--

रक्तं रक्तैरिह विजहतां देशधर्मप्रतिष्ठा-
रक्षायज्ञे वपुरपि, रजो दुर्लभं रक्षतेवम् ।
यस्मादस्मै स्पृहयति शची त्यक्तकस्तूरिकेति-
हल्दीघाटी कथयति जनान् पक्षिणां कूजितेन।।२४।

भो भारतीया ! धर्मस्य देशस्य च प्रतिष्ठारक्षार्थं युद्धयज्ञे निजदेहमपि हुतवतां वीराणा रक्तैरक्त-मिदं रजो यत्नेन रक्षत । यतो देवराजस्येन्द्रस्य भार्या शची कस्तूरीकङ्कुमादिकमपि तिरस्कृत्य पावन-मिति धिया स्वमस्तके तिलकरचनार्थम् इद रजो जिहीर्षति-इति रहस्यं हल्दीघाटी पक्षिणां कूजित-व्याजेन कथयतीव । नेदं पक्षिणा कूजितं किन्तु हल्दीघाट्या: हितवचनमित्यपह्नुतिरलङ्कार: । शच्यास्तादृशव्यवहाराऽसम्बन्धेऽपि सम्बन्धावर्णना-दसम्बन्धे सम्बन्धरूपाऽतिशयोक्ति. । तथा च कस्तूरिकाया: अपेक्षया रजस उत्कर्षव्यञ्जनाद् व्यतिरेक: ।

पद्ययोरनयोर्विवक्षितविषयसाम्येऽपि वर्णनशैली-भेदात् सौन्दर्यसम्बन्धे तयोरौत्तराधर्मं सर्वस-हृदयसंवेद्यम् । तत्र हेतुश्च अवक्तॄणां वक्तृभाव-कल्पनया तदुक्तौ सजीवतावतारो नाटकीय-ताया प्रभावतीव्रता अमूर्तेषु मूर्तत्वोपधानात् तेषां प्रत्यक्षायमाणता चेति ।

यथा वा--

राजन्राजसुता न पाठयति मां,
देव्योऽपि तूष्णीं स्थिता. ।
कुब्जे भोजय मां कुमार-
सचिवैर्नाऽद्यापि किं भुज्यते ?
इत्थं राजशुकस्तवारिभवने
मुक्तोऽध्वगै: पञ्जराच्चित्रस्थानवलोक्य
शून्यवलभामेकैकमाभाषते ।।
साहित्य[1]दर्पणे परि० १०। कारि० ६४।

इहं शुक वक्तारं प्रकल्प्य तन्मुखवर्णितया अप्रस्तुतया शत्रुभवनदशया स्तूयमानस्य प्रस्तुतस्य राज्ञ. प्रतापवर्णनं कामप्यपूर्वां विच्छित्तिमावहति । यथा च प्रबोधचन्द्रोदये अमूर्तं क्रोधं वक्तारं प्रकल्प्य--

अन्धीकरोमि भुवनं बधिरीकरोमि,
धीरं सचेतनमचेतनतां नयामि ।
कृत्यं न पश्यति, न येन हितं शृणोति,
धीमानधीतमपि न प्रति सन्दधाति ।। अं० २

इत्यनेन तदीयवाक्येन क्रुद्धस्य पुंसो व्यवहार-निरूपणद्वारा अमूर्तोऽपि भाव: क्रोधो मूर्तिमान् कृत. ।

इयं कविनिबद्धवक्तृप्रौढोक्ति. क्वचित् प्रश्नोत्तरशै-ल्योपस्थापिताऽधिकतरं चमत्कारमाविष्करोति ।

---

१. अत्र प्रस्थानोद्यतं भवन्तं श्रुत्वा सहसैवाऽरय: पलायिता इति कारणं प्रस्तुतम् । कार्यमपि वर्णनार्हत्वेन प्रस्तुतमिति केचित् । अन्ये तु (काव्यप्रकाशकृतस्तु) राज-शुकवृत्तान्तेन कोऽपि प्रस्तुतप्रभावो बोध्यत इत्यप्रस्तुतप्रशंसैवे-त्याहु:।। इति साहित्यदर्पणस्य दशमपरिच्छेदे पर्यायोक्तालङ्कारप्रसङ्गे । कारि० ६० ।

यथा—

कालिन्दि, ब्रूहि कुम्भोद्भव, जलधिरहं,
नामगृह्णासि कस्माच्छत्रोर्मे ?
नर्मदाऽहं त्वमपि वदसि
मे नाम कस्मात् सपत्न्याः ?
मालिन्यं तर्हि कस्मादनुभवसि ?
मिलत्कज्जलैर्मालवीनां नेत्राऽम्भोभिः,
किमासां समजनि ?
कुपित. कुन्तल क्षोणिपाल ॥

कुवलयानन्दे० ॥

पद्येऽस्मिन् स्वश्यामतानिमित्तं प्रति समुद्रेण पृष्टा नर्मदा मालवीना रोदनं तस्याऽपि निमित्तं तासां वैधव्यहेतुं कुन्तलेश्वरस्य क्रोधमकथयत् । एतेन कल्पितयोर्द्वयोर्वक्त्रोरप्रस्तुतेन संवादेन प्रस्तुतं कुन्तलेश्वरप्रतापवर्णनं नितरां मनोहारि ।

इहकविनिबद्धवक्तृप्रौढोक्तिसिद्धेन भ्रान्तिमताऽलङ्कारेण निश्चयात्तस्य सन्देहस्य अथवा श्रीविश्वनाथेन निरूपितस्य निश्चयालङ्कारस्य ध्वनि । नर्मदाया. श्यामत्वहेतुं मलिवीना सकज्जलदृग्जलमिलनस्य कथनेन कालिन्दीत्वरूपभ्रमनिरासे नर्मदैवेयमिति स्थापनात् ।

"अन्यान्निषिध्य प्रकृतस्थापनं निश्चय. पुन.।" इति तल्लक्षणं साहित्यदर्पणस्य १०मपरिच्छेदे ३६तमकारिकायाम् । अत्र नर्मदैवेयं न कालिन्दीत्यनुक्तेऽपि तत्प्रतीतेर्निश्चयस्य व्यंजनैव । किं च–यदि प्रस्तुतेन कुन्तलेश्वरस्य कोपेन कारणेन प्रस्तुतस्य मालवेन्द्रवधस्य कार्यस्य व्यञ्जना तदा अप्रस्तुतप्रशंसा । अथ कुन्तलेश्वरकोपोऽपि मालवेन्द्रवधवत् प्रस्तुत एव तदा उभयोः कारणकार्ययो. प्रस्तुतत्वात् पर्यायोक्तालङ्कारः । पर्यायोक्तं यदा भङ्ग्या गम्यमेवाऽभिधीयते । साहित्य०, १०म परि०, कारि० ।

यथा वा—

ग्रासार्जनाय शुक यज्जनरञ्जनेन
त्यक्त्वाऽऽत्मनः परगिरं त्वमुरीकरोषि ।
किं भुज्यते तदपराधफलं त्वयेदमा-
जीवनं कठिनपञ्जरसंस्थितेन ?॥२५॥

शुकस्योत्तरम्—

वाचा वदामि विवशोऽन्यगिरं हृदा न
नैवाऽस्मि यूयमिव तेन च गर्वितो वा ।
स्यां दण्डितो यदि तथापि,
दशाऽस्तु का वः स्वेच्छानिरस्त-
निजसंस्कृतिवेशवाचाम् ॥२६॥

एते पद्ये मामकीने ।

हे शुक त्वं यज्जनरञ्जनेन ग्रासार्जनाय निजगिरं परित्यज्य परभाषामङ्गीकरोषि, किं तवाऽयं पञ्जरेऽवरोधस्तस्यैवाऽपराधस्य फलम् ? शुकः प्रतिवदति । भो मानव अहं तु प्राक्तनस्य कस्यचित्पाप्मनो दुर्विपाकवशात् पञ्जरबद्धो विवशः सन् परगिरमुद्गिरामि, तामपि कण्ठमात्रेण न तु हृदा । यदि तथापि दण्डनीयोऽस्मि सवृत्तस्तर्हि ये मानवाः स्ववेशभाषासंस्कृत्यादिकं स्वेच्छया तिरस्कृत्य हीनमपि परकीयमेव सर्वमङ्गीकुर्वन्ति तेन च गर्वमनुभवन्ति तेषां का दशा भविष्यति ? अत्र नैवाऽस्मि यूयमिव तेन च गर्वितोवा ।" इति शुकोत्तरे स्ववेशभाषादितिरस्कर्तारस्तिर्यग्भ्योऽपि हीनतरा इति व्यतिरेकः । "उपमानाद् यदन्यस्य व्यतिरेकः स एव सः" इति तल्लक्षणं काव्यप्रकाशे दशमोल्लासे । अत्र कविनिबद्धवक्तृप्रौढोक्तिमात्र सिद्धेन व्यतिरेकालङ्कारेणस्ववेशभाषादितिरस्कारस्य हीनभावनयाऽन्येषामन्धानुकरणस्य च गर्हारूपं वस्तु व्यज्यते ।

विषयप्रतिपादनस्य शैलीयं वैदिककवये (परमात्मने) नितरां रोचते । अतो भावनाप्रधानेषु

प्रसङ्गेषु प्रभावातिशयजननाय न कदाचिदिमामेवाऽनुसरति ।

अस्य कविनिबद्धवक्तृप्रौढोक्तिसिद्धस्य ध्वनेरपि १. व्यंजकेन वस्तुना व्यंग्यस्य वस्तुनः, २. वस्तुना अलङ्कारस्य, ३. अलङ्कारेण वस्तुनः, ४. अलङ्कारेण अलङ्कारस्य च व्यंजनात् पूर्ववदेव चत्वारो भेदाः संभवन्ति ।

तेषु अर्थशक्त्युद्भवध्वनेः कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन वस्तुना वस्तुध्वनिरूपो नवमो भेदः ।

रमध्वं मे वचसे सोम्याय ऋतावरी रुपमुहूर्तमेवैः ।
प्रसिन्धुमच्छा बृहती मनीषाऽवस्यु रह्वे कुशिकस्य सूनुः
ऋक् ३। ३।५॥

इन्द्रो अस्मानरदद् वज्रबाहु-
रपाहन् वृत्रं परिधि नदीनाम् ।
देवोऽनयत् सविता सुपाणिस्तस्य
वयं प्रसवे याम उर्वी ॥ ऋग् ३।३३।६

नदी. प्रति ऋषेर्विश्वामित्रस्येयमुक्तिः । ऋतमुदकम्तद्वत्य. ऋतावर्यो नद्य. । हे ऋतावर्यः वर्षासु प्रभूतजला यूयम् । सोम्याय मधुराय मे वचसे मम वचनं श्रोतुम् । मुहूर्तम् क्षणं यावत् एवैः गमनैः उपरमध्वम् विरमत जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् इत्यनेन एवेभ्य इति पञ्चम्याः स्थाने तृतीया प्रयोगश्छान्दस । एवैरिति एवैर् गतिः । कुतो नु वयमुपरमेमहीति चेत् ? कुशिकस्य प्रार्थनाकर्तुः जलप्लावनकष्टेन क्रन्दितु. जनसमूहस्य सूनुः सुतः पुत्रवत् प्रतिनिधिरहम् । अवस्युः युष्माकं जलैराप्लावितप्रदेशस्य पीडितजनानां रक्षणमिच्छन् । अवरक्षणे धातोः अवनम् अवस् तेन सुप आत्मनः क्यच् (पाणि० ३।१।८) इति क्यचि, क्याच्छन्दसि (पाणि० ३।२।१७०) इत्यु प्रत्यये रूपम् । अथवा-अवनम् अव. । ततः सर्वं प्रातिपदिकानां क्यचि लालसायां सुगसुकौ । इत्यनेनअवस्यतीत्यवस्युः । क्याच्छन्दसीत्युप्रत्येय अवस्यु. । सिन्धुम्–सिन्धुः स्रवणादिति निरुक्ते श्री यास्क । अथवा सीमानं स्वकूलयोः कूलवर्तिनां प्रदेशानां वा धुनोति उल्लंघ्य गच्छतीति सिन्धुः । त्वाम् अच्छा-अभिलक्ष्य आभिमुख्येनवा । बृहतीमनीषा बृहत्यामनीषया महता मनोयोगेन । स्तुत्या प्रज्ञयावेति श्रीयास्क. । प्राऽह्वे आह्वयामि प्रार्थये । कोऽसौ कुशिकः ? कुशिकः क्रोशते. शब्दकर्मण क्रंशतेर्वा स्यात् प्रकाशयतिकर्मण । साधु विक्रोशयितार्थानाम् । इति निरुक्ते यास्क । अध्या०२। पा० ७। ख० २५) स्वमनोभावाना सम्यक् प्रकाशने कुशल. । तस्य सूनुः पुत्रवत् प्रतिनिधि सोऽपि तद्गुणविशिष्टः । स च विश्वामित्रः सर्वेषां मित्रत्वमुपगतो न कश्चिद्व्यक्ति विशेष. । उपरमध्वम् इत्यत्र वर्षासु प्रवृद्धोदकाः सर्वाः सरित उपलक्ष्य बहुवचनेन निर्देशः उत्तरार्धे सिन्धुं त्वामित्यत्र प्रत्येकमभिलक्ष्य पृथक् प्रार्थनायामेकवचनम् ।

द्वितीयमन्त्रे नदीनामुत्तरम् । वज्रबाहुरिन्द्रः सूर्य, मध्यस्थान. (विद्युदात्मा) परमेश्वरो वा । नदीनाम् नभसि नदन्तीनां मेघस्थानाम् अपाम् । परिधि परितो धीयते इति, सर्वतो व्याप्यभूमौ पतनात् प्रतिरोद्धारम् वृत्रं मेघम् । जघान । तेनाघातेन मेघे भिन्ने सति अवरुद्धानि जलानि धारा रूपेण पतितानि "वृत्रो मेघे रिपौ ध्वान्ते दानवे वासवे-गिरौ ।" इत्यनेकार्थसग्रहे श्रीहेमचन्द्राः । सविता सर्वप्रेरक. । सुपाणि. शोभना किरणरूपा. पाणयो यस्य स. । देवो दानाद्वा, दीपनाद्वा विद्युदात्मा प्रवहन्तीभिर्जलधाराभिर्नो गमनमार्गान् अरदत् अखनत् । रद विलेखने । तस्यैव देवस्य प्रसवे आदेशे प्रेरणाया वा विद्यमाना वयम् उर्वीर्महत्यो नद्यो यामः सततं गच्छामः । अनेन कविनिबद्धवक्तृप्रौढोक्तिसिद्धेन वस्तुना तव प्रार्थनाश्रवणाय नाऽस्त्यस्माकमवकाश इति वस्तु व्यज्यते ।★

(क्रमशः)

स्वर्गतः सर्वपल्ली राधाकृष्णमहोदयः

विद्याभूषणः श्रीगणेशराम शर्मा

श्रीराधाकृष्णमहाभागस्य जन्म मद्रासप्रदेशस्य चित्तूरमण्डलान्तर्गते तिरुत्तनीनामके ह्येकस्मिल्लघुनिग्रामे किलैकस्मिन्निर्धने किन्तु पवित्रे ब्राह्मणपरिवारे समभूत्। यथा स स्वयमेव स्वकीयायामात्मकथायामलेखीत् तस्य मातापितरौ धार्मिकप्रवृत्तिकावास्ताम्। तयोः सविधेनाधिकं धनं सम्पत्तिर्वाभूताम्। तद्गृहे सर्वेषामपि सदस्यानां न्यूनाधिकं संस्कृतभाषाया ज्ञानमासीत्। तस्य पिता खल्वेकस्य भूस्वामिनोऽन्तिके मण्डलाधिकारिणः कार्यं सम्पादयति स्म। तस्य मासिकं वेतनं केवलमष्टौ रूप्यकाणामासीत्। एतावतैव द्रव्येण स कथमपि गृहव्ययं निर्वाहयति स्म। तस्यैवंविधा दयनीयार्थिकी स्थितिः समभूत्तथापि धार्मिके वातावरणे राधाकृष्णमहाभागस्य लालनं, पालनं, पोषणं चाभूत्।

अथ बालको राधाकृष्णस्तिरुत्तनीग्रामे दर्शनार्थमागतान् यात्रिणः पश्यति स्म तदा मननशीलस्वभावाद्धेतोश्चिन्तयति स्म यदिमे यात्रिणो लोकाः किमर्थमेतावतो दूरात्तदिदं संकीर्णं स्थानमागच्छन्ति? दर्शनकरणात्तेभ्यः को नु बत लाभो भवति नाम? एवंविधा विभिन्नाः प्रश्नास्तस्य मस्तिष्के ननूहापोहाञ्जनयन्ति स्म किन्तु तत्समाधानं किमपि न भवति स्म। यदाप्यसौ बालो राधाकृष्ण एकाकी तस्थौ तदा किमपि चिन्तनमकरोत्। निर्धनान् दरिद्रान् ग्रामीणान् दर्शं दर्शं तद्हृदये कापि व्यथा समुत्तस्थे, कश्चिदेकः प्रहाराघात इव भवति स्म। स तदा कथयति स्म, "वराका निर्धनाश्चापीमेऽत्रागमने कियद्द्रव्यव्ययं कुर्वते! कियानस्मविश्वासोऽस्त्येषु! स्वस्य सर्वाण्यपि च कार्यजातानि त्यक्त्वात्रागच्छन्तीमे! एतेषां पुरतोऽन्नपानादिकमेव न हि धर्मोऽपि च वर्तते! ईश्वरोऽपि चास्ते!"

'सम्पत्स्यमानवृक्षस्य स्निग्धाः स्युर्ननु पल्लवाः।' इत्युक्त्यनुसार प्रारम्भत एव राधाकृष्णः स्वात्मनोऽलौकिक्याः प्रतिभायाः परिचयं प्रददानोऽभूत्। विद्याभ्यसनमेव तस्यैकमात्रं व्यसनमभूत्। विद्यालयजीवने सोऽतीव सरलतयाऽवर्तत। सेयं विवशतासीत्। छात्रवृत्तिरुपलभ्यते स्म तथा किंचित् स्वगृहत आनाय्य स कथमपि येन केन प्रकारेण स्वनिर्वाहं कुरुते स्म! कुशाग्रबुद्धित्वादद्भुतस्मरणशक्तेश्च हेतोस्तत्सहाध्यायिनस्तं चलविश्वकोषमवदन्। केषांचिल्लोकानामियं धारणास्ते यद्धि छात्राः पाठशालासु, विश्वविद्यालयेषु वाध्ययने प्रथमश्रेणीका विद्यार्थिनो भवन्ति ते प्रायेण ग्रन्थकीटा भवन्ति तथा जीवनसङ्घर्षे पततामेव तेषां प्रतिभाछिन्नभिन्नासती प्रणश्यतीति। परन्तु नियमस्यास्य सर्वतो महात्मापवादरूपास्त एते खल्वाचार्या राधाकृष्णमहाभागा अभूवन्। अध्ययने कुशाग्रधिषणाश्चापीमे व्यावहारिके जीवने कर्मठास्तथा च व्यावहारिके जगति पदार्पणं कृतवतामेवैतेषां प्रतिभा यथापूर्वमकुण्ठिता बभासे वरञ्चानुभवात्सा भृशं दिदीपे।

प्रत्येकस्य मनुष्यस्य जीवने शिक्षाया महत्त्वपूर्णं स्थानं भवति। राधाकृष्णमहोदयः स्वयं तस्यात्मकथायामलेखीत्--"ख्रिष्टीय धर्मसंस्थास्वहं पाठशालासु, विद्यालयोचितां च शिक्षामलभे। स्वजीवनस्य महत्त्वपूर्णे काले मम 'न्यूटेस्टामेण्ट' इत्यस्य शिक्षाभिः परिचयेन साकमीषवीयधर्मप्रचारकाणां, तासामालोचनानामपि च ज्ञानमभूद्यास्ते भारतीयधर्मस्य, संस्काररीति-प्रथादीनां चाकुर्वन्। स्वामिनो विवेकानन्दमहाभागस्य भाषणानां तस्य च साहसपूर्णानां कार्याणां मयि भूयान् प्रभावः पपात। तथाह-

मात्मनो हिन्दुधर्मस्याभिमानं वोढुमारभे । परन्तु ख्रिष्टीयानां संस्थासु हिन्दुधर्मेण सह यो हि दुर्व्यवहारो भवति स्म तत्कारणान्मम हृदि महानाघातो भवति स्म । अस्माकं समग्रस्य ज्ञानस्य, कर्मणश्चाधारो भारतीया संस्कृतिर्वर्तते । ये हि तपस्विनः शिक्षकाश्च संसृतये किलैवंविधां महतीं संस्कृतिं प्रददुस्तथा तया सह संसारस्य सम्पर्कं स्थापयामासुस्ते वस्तुनो धर्मात्मानो नाभूवन्—सेयं वार्ता मम बुद्धिग्राह्या नैव भवति स्म । ख्रिष्टधर्मावलम्बिभिः कृता हिन्दुधर्मस्यालोचना मां हिन्दुधर्मस्याध्ययनाय विवशं चक्रु । हिन्दुधर्मस्य जीवतां प्रणष्टानां च तत्त्वानामनुसन्धानाय ते प्रबलमाग्रहं चक्रिरे । समय-प्रवाहो मे तमिमं निश्चयं समधिकं सुदृढमकरोत् ।"

राधाकृष्णमहाभागस्य सर्वप्रथम 'वेदान्ते नीतिशास्त्रम्' इत्यस्य पुस्तकस्य प्रकाशनं विंशतिवर्षाणामायुषि समभूत् । पुस्तकस्यास्य मुखपृष्ठे स्वकीयं नाममुद्रिताक्षररूपं दृष्ट्वा सोऽतीव मुदमन्वभूत् । आलोचकानां कथनमस्ति यद्वेदान्ते नीतिशास्त्रस्याभावो विद्यत इति । तस्यायं ग्रन्थस्तथाविधाया आलोचनाया उत्तररूपः प्रासिद्ध्यत् । प्राध्यापक रा· जी· हौगमहाशयो, यो हि राधाकृष्णस्य दर्शनशास्त्रस्य प्राध्यापकोऽभूद्यश्च धार्मिकेषु विषयेष्वतीव सूक्ष्मेक्षिकया मार्मिको मीमांसकोऽभूत्, ग्रन्थस्यास्य सम्बन्धि तस्य प्रमाणपत्रं प्रादाद्यदद्यापि राधाकृष्णमहाभागस्य पुकर्मलसंहतौ सुरक्षितं स्यादवधृतम् —— "स्नातकोत्तरोपाधिलाभाय स्वस्य शिक्षणकालस्य द्वितीये वर्षे स (राधाकृष्णः) यं हि महाप्रबन्धं (थीसिस) लिखितवान् तस्याध्ययनादेतत् प्रकटीभवति यत्तस्य दार्शनिकीनां समस्यानां प्रमुखानामङ्गानां च सविशेषं ज्ञानमास्ते । आंग्लभाषायाः साधीयसाधिकारेण सार्द्धं युक्तियुक्तानां तर्कोहापोहाणामवबोधस्यापि तस्य योग्यता वर्तते ।"

सोऽयं श्रीराधाकृष्णमहाभागः स्वजीवने व्याख्यातृरूपेण पदार्पणं समकरोत् । स खलु षष्ठीरूप्यकाणां मासिकं वेतनं लभते स्म । सोऽतीव कुशलोऽथ सफलश्चाध्यापकः समसिद्ध्यत् । तद्विद्यार्थिनो दर्शनशास्त्रस्य कक्षायां तथैव रसास्वादनमकुर्वन् यथा साहित्यसंगीतकलादीनां छात्राः प्रायेण कुर्वन्ति । तस्यांग्लभाषाया ज्ञानमतीव प्रौढं सुन्दरं साधिकारं चासीत् । न केवलं स भाषाया अस्याः पण्डित एवापितु तत्साहित्यस्यापि च मर्मज्ञो महानासीत् । कक्षायां च स यथार्थनामा प्राध्यापक इव ज्ञानविस्तारमकरोत् किन्तु बहिः कक्षं स छात्रैः सह नयैकरमो भवति स्म यत्तस्य परिचितिरपि कठिना भवति स्म । स स्वान्तेवासिनः स्वात्मनः पृथङ्न मेने ।

विश्वकवीन्द्रस्य रवीन्द्रनाथठाकुरमहोदयस्यानुपमानां कृतीनां राधाकृष्णोपरि गम्भीरः प्रभावो निपपात । स हि स्वात्मकथायामलिखत्——"हिन्दुनीतिशास्त्रेषु मायावादसिद्धान्ते चाहं श्रीरवीन्द्रनाथटागोरमहाभागस्य रचनाभ्यो महतीं हि प्रेरणामलभे । अहं तस्य रचनानामांग्लभाषानुवादानपठम् तथा तत्परिणामस्वरूपमेकं पुस्तकं चालिखम् यद्धि सन् १९१८ईसवीये वर्षे मेकमिलनेति लन्दननगरस्था प्रकाशनसंस्था प्राकाश्यं निन्ये । तरुणावस्थायामपरिपक्वविचाराणां कारणाद् ये ये दोषा भवितुं सम्भवन्ति, ते सर्वे पुस्तकेऽस्मिन्नवर्तन्त । सत्यप्येवं प्रजाजनैरेतस्य स्वागतमकारि । गुरुदेवायापि च पुस्तकमिदमतीव रुचिकरमाभात् । रवीन्द्रनाथो राधाकृष्णमहोदयं प्रति सन् १९१८ईसवीये वर्षे दिसम्बरमासे पत्रमेकमलेखीत् —— "यस्य पुस्तकस्य मया सह सम्बन्धोऽस्ति तस्य समालोचनमुचितं न भवति तथाप्यहमेतावद्वक्तुं पारये यत्तदिदं पुस्तकमाशातोऽधिकं सुन्दरमस्ति । यद्भवानेतत् सुन्दरं पुस्तकमलिखत्, कदाचिदेवास्यापेक्षयान्यः कश्चिदतोऽधिकं सुन्दरतरं पुस्तकं लिखितुं सक्षमोऽभविष्यत् । पुस्तकलेखने भवान् यं परिश्रममकरोत्तथा च सूक्ष्मपर्यवेक्षणस्य परिचयं प्रादात्तस्मादहमा-

श्चर्यमन्वभवम् । भवतां भाषायां साहित्यिकं सौन्दर्यमास्ते तथा सा व्यर्थालङ्कारैराडम्बरेण च मुक्तास्ति । एतत्कृतेऽहं भवद्भ्यो धन्यवादानर्पयामि ।" तदिदं पुस्तकं राधाकृष्णमहाभागमेकं चिन्तकं तथा लेखकनाम्ना निखिलेऽपि च विश्वस्मिन् सुप्रसिद्धं चक्रे ।

'जार्जपञ्चम – मानसिकाध्यात्मविद्या' इति पीठेऽस्याचार्यस्य राधाकृष्णमहाभागस्य प्राध्यापकत्वेन नियुक्तिस्तस्य जीवनस्यैका महत्त्वपूर्णा घटनास्ते । इदमेव पदमधितिष्ठता तेन स्वजीवनस्य सर्वोत्तमा कृतिः––'भारतीयदर्शनस्येतिहासो' भागद्वये व्यरच्यत । सा च कृतिरिङ्गलैण्डतः प्राकाश्यत । तस्येमं महाग्रन्थं विन्सेण्टशियेनमहाशयः 'संस्कृतविद्वत्ताया प्रकाशस्तम्भः' इत्यकथयत्, यस्य तुलनायां शर्मण्यदेशेऽपि च न कोऽपि ग्रन्थो विद्यते ।

अथास्य राधाकृष्णमहाभागस्य विदेशयात्रायाः प्रारम्भोऽष्टत्रिंशद्वर्षावस्थायामभूत् । ब्रिटिशसाम्राज्यान्तर्गतानां विश्वविद्यालयानां सम्मेलने कालिकाता विश्वविद्यालयस्य प्रतिनिधिरूपेण स इङ्गलैण्डमगच्छत् । तत एव चान्ताराष्ट्रियदर्शन–सम्मेलने भागं गृहीतुममेरिकादेशं ययौ । तत्रत्याः प्रजास्तमिमं राधाकृष्णमहाभागं 'द्वितीयो विवेकानन्दः' इति नाम्ना सम्बोध्य तत्सम्मानमकुर्वन् ।

श्रीपालब्रन्टनमहाशयस्य शब्देष्वाचार्यवर्यस्य राधाकृष्णमहाभागस्य–ग्राक्सफोर्ड – विश्वविद्यालये पौर्वात्यधर्माणां तथा नीतिशास्त्रस्य च प्राध्यापकत्वेन नियुक्तिस्तस्य धार्मिकजीवनस्य तथा विश्वस्य सांस्कृतिकेतिहासे किलैकोल्लेखनीया घटनास्ते । अस्या नियुक्तेः परिणामस्वरूपं राधाकृष्णमहोदयो भारतीयसंस्कृतेश्चिरन्तनं सन्देशं यूरोपीयानां हृदयान्तःपर्यन्तं प्रापयितुं सक्षमोऽभूत् ।

अथाचार्यवर्यस्य राधाकृष्णमहाभागस्य मानवतायां सुदृढोऽधानविचनश्च विश्वासोऽभूत् । अथ चैकदा तस्मा एकोऽभिनन्दनग्रन्थः समर्पितो यस्मिंस्तस्य मानसिकीनां, धार्मिकीनां च विशिष्टतानां वर्णनप्रसङ्गे सः 'साधु पुरुषः' प्रोक्तः । तस्योत्तरं प्रददानेन तत्र तेनोक्तमभूत्––'नाहं साधुर्वा महात्मा वाऽवर्ते, यतोऽहं जीवनोपभोग्यानां सामान्यसुखानां पारिवारिकस्य स्नेहस्य, प्रेम्णो, मित्रताया, विश्वासस्य, भक्तेश्चानन्दमुपभुञ्जे, यदा चैतेषां पवित्राणामात्मिकसम्बन्धानामपहरणं वाऽभावश्च भवति तदानेन मे मानसी व्यथा भवति । अहं हि साधुत्वापेक्षया मनुष्यत्वमेवोपभोक्तुं कामये ।'

राधाकृष्णमहाभागस्यैतत् कथनमस्ति, यन्मनुष्यजीवनस्योद्देश्यं भोगविलासादिकं नास्ति वरञ्चैकस्य महोद्देशस्य पूर्तिरास्ते । नायं संसारो मिथ्यास्ते, परन्त्वेकं नैतिकं क्षेत्रं तथा च मोक्षस्य मार्गो वर्तते । अथ च जीवनं नाम स्वप्नो नास्ति, प्रत्युत सत्यं विद्यते । राधाकृष्णमहोदयस्यायं विश्वासोऽस्ति यत् संसारे साफल्यापेक्षया सौजन्यं श्रेष्ठतरं हि वर्तते । मानवतैव राधाकृष्णस्य धर्मो विद्यते । स खल्वस्मद्युगीनो विदेहोऽभूद्यः संसारे निवसन्नपि मोहमायाभ्यामतीतोऽभूत् । स खलु 'वसुधैव कुटुम्बकम्' सममन्यत । वैदिककालीना महर्षय इव स तमिममादर्शं विश्वस्य कोणं प्रतिकोणं पर्यटन् सन् पर्यपालयत् तदेव प्रत्यपादयच्च ।

अथ राधाकृष्णमहाभागः परिचितैर्जनैः सह सविशेषमानन्दमनुभवति स्म । अपरिचितानां लोकानां मध्ये सविशेषं चेष्टमान एव हि स कार्यकलापन्निर्वोढुं पारयते स्म । कामं कोऽपि वृद्धो वा, युवको वा, दीनो वा, सम्पन्नो वा भवतु, स सर्वैरपि समानं व्यवहरति स्म तथा च सर्वैरपि समरसं सौहृदमात्मीयतां च संस्थापयति स्म । तस्मै केनापि जनेन सहैकवारं क्षणमात्रमपि मिलनस्य, सम्भाषणस्य चावसरः प्रदत्तश्चेत्तदा स तं जनं सर्वदैव स्वकीये स्मृतिपथे समङ्कयति स्म । मिलनसमये सः शनैः शनैर्माधुर्येण नामधामादिकं परिचयं परिपृच्छति स्म । एकदा जातपरिचयो राधाकृष्णमहाभागोयदा

पुर्नमिलनावसरमाप्नोति स्म तदा साक्षात्कारे जात एव हि तन्नामग्राहमेव सम्बोधयति स्म ।

अथैतदपि च पुर्ननिर्देशयोग्य यद्धि गाम्भीर्यमेव हि राधाकृष्णमहाभागस्य सर्वस्वं नासीन् । यदा स छात्राणां किं वान्येषां जनानां समुदायमध्ये समभूत्तदा स खल्वेतदपि चावद्धद् यत्स किलैको महादार्शनिकश्चिन्तकोऽभूदिति । स खल्वेवंविधान् हासपरिहासान् विनोदगर्भान् वार्तालापान् कर्त्तुं प्रारभते स्म येषामुत्तरमपि दातु न कश्चन पारयते स्म । यदा कदा स खल्वेतावद्विनोदनिमग्नो भवति स्म यच्छ्रोतारो मुक्तकण्ठं साट्टहासं हसन्त प्रोत्फुल्लचित्ता भवन्ति स्म । अथ पुन. कदाचित् स एतावत् गम्भीरमुद्रामग्नो भवति स्म यत्तस्य कक्षे शान्तेर्निस्तब्धतायाश्च साम्राज्यं परिव्याप्नुते स्म । स खलु हास्यविनोदादिप्रसङ्गेषु महात्मा गान्धिरिवासीत् । प्रत्युत्पन्नमतित्वे स जॉर्ज बर्नार्डशामहाशय इवाभूत् । तेन साकं वार्तालापे महानेवानन्दोऽनुभूयते स्म । कमपि विषयमधिकृत्य भाषमाण. स स्यात्, सदैव तद्भाषणं रुचिकरमेव प्रतिभाति स्म ।

अथ राधाकृष्णमहाभागः सन् १९५२ ई वर्षे मईमासे स उपराष्ट्रपतिपदमधितष्ठौ । अस्मिन्नेव समयान्तराले सोऽनेकेषां देशानां यात्रामकरोत् । तस्य विदेशयात्राभिर्भारतदेशो द्विगुणं लाभं लेभे । अथ सन् १९५७ ई. वर्षे पुनरुपराष्ट्रपतिपदे निर्वाचितोऽभूत् । सन १९६२ ई. वर्षे स देशस्यास्य भारतवर्षस्य सर्वतो वरिष्ठ सम्मानितं राष्ट्रपतिपदप्रतिष्ठाया गौरवं प्राप । भारतराष्ट्रस्यास्य राष्ट्रपतिपदे विराजमानोऽयं राधाकृष्णमहोदयः सर्वाणि कार्यजातानि साधिकारं कौशलेन सम्पादयँस्तस्थौ । सर्वविधा जनास्तदन्तिके साहाय्यमाप्तुं, विचारविमर्शार्थं च व्रजन्ति स्म । सोऽन्येषां सहायतार्थं यथाशक्ति सदैव तत्परोऽस्थात् परन्तु नैतत्प्रदर्शनं तस्मा अरोचत यत् सः किं विधां सहायतां क्व नु कदा कर्त्तुं प्रभविष्यतीति । यदा कस्मैचित् साहाय्यस्यावश्यकता समभूत्तदा तेनोन्मुक्तहृदयं तद्विहितम् । तस्यैवंविधानां कार्याणां कृते बहवो जनास्तं सकृतज्ञताभारं स्मरन्ति, स्मरिष्यन्ति च । यदि च कदाचित् स कस्यचिज्जनस्य यावदपेक्षितां सहायतां विधातुमसमर्थो भवति स्म, तदा स तं विनम्रैः शब्दैस्तत् कथयति स्म अथैकदोत्तरप्रदेशस्य श्रीखेरमहोदयो राधाकृष्णमहाभागेन साक वार्तालापप्रसङ्गमधिकृत्यावोचत् 'स हि परमस्नेहभावेन मिलति । स एव गुणोऽस्मिन्नेव रूपे नेतृवर्येषूपलभ्येत चेत्तदा प्रभूतं कार्यजात विनैव निवेदन स्वत संसिध्येन्नाम नूनम् ।"

. राधाकृष्णमहाभागस्य महात्मा गान्धि.' इत्यस्य पुस्तकस्य समालोचना विदधानो दार्शनिकप्रवरो बर्ट्रेण्ड रसलमहाशयो वाक्यादस्मात्तदारम्भं कृतवान्--''महात्मनो गान्धे. सफलतासु तत्साफल्यस्यैक मुख्यं कारणमिदमपि चास्ते यत्तस्मै प्राध्यापकराधाकृष्णसदृशस्य जनस्य श्रद्धासमुपलब्धु सुशका बभूव ।"

विद्यावाचस्पते राधाकृष्णमहाभागस्य भाग्येऽविचलोऽस्ति विश्वासः । स्व जीवने साफल्यस्य कारणमपि च स भाग्यमेवामन्यत । स्वस्य न्यूनाधिकसफलतायाः कारण विवृण्वान स स्वात्मकथायां लिलेख--"भाग्यं हि ममानुकूलम् तच्चेदानीं यावन्मां रक्षद्विद्यते । इत्थं प्रतीयते, यद्येषु झंझावातेषु--अन्यान्यास्तरण्य शिलासङ्घातैः प्रतिहताः खण्डशो विनाशं जग्मुस्तेष्वेव कश्चन कैवर्तको महत्या हि सावधानतया ममोडुपं नीयमानोऽस्ति तारयन् । मयैवमनुभूयते, यत् काप्यज्ञाता शक्ति. किमपि महदुद्देश्यमभिसन्धाय मम मार्गप्रदर्शनं कुर्वाणा तस्थौ । नाहमेतन्मन्ये यद् भगवान् मयि कृपा विधत्ते, परन्त्वेतन्मन्ये, यन्मम जीवने यां कामपि सफलतां न्यूनाधिकामहमलभे, तद् भाग्यस्य महद्योगदानमास्ते । परन्तु नाहमिदमिच्छामि यदहं ममासफलतानां दोषं भाग्यस्य, परिस्थितीनां वा

शिरस्यारोपयेयम् । असफलतानां कृते ममात्मनो दोषा एवोत्तरदायित्वमावहन्ति ।''

अथासौ राधाकृष्णमहाभागो न केवलं सदासर्वदव 'सरलं जीवनमुच्चविचाराः' इत्युक्ति मिमां चिन्तयामासापितु सिद्धान्तमिमं स्वजीवनेऽपि क्रियात्मनाऽन्वर्थनामनैषीत् । वैभवपूर्णं राष्ट्रपतिभवनमधिवसन्नपि नाश्रमाचार्यन्मिनागपि च भिन्नधर्मास्ते तस्य वेषभूषान्नपानादिकं, जीवनपद्धतिर्दिनचर्याक्रमः सर्वमपि प्रायेण तथाविधमेवावर्तत यथा तत् पूर्वमभूत् । आसनोपस्करादिकं तत्समन्ततः साधारणमिवानाडम्बरं विततं पर्यस्तं च सन्तिष्ठते स्म । स स्वयमेकं पर्यङ्कमधिशयानोऽध्ययनपरोऽथवा लिखन् विलिखंस्तस्थौ । तस्य समीपे काष्ठमञ्चे हीतस्ततः पुस्तकसमूहः प्रसृतोऽविद्यत । पृष्ठभागे वाग्व्यवहारोपयिकमेकं ध्वनियन्त्रं (टेलीफोन) तथा दार्शनिकविषयाणां, धार्मिकानां च पुस्तकानां काष्ठकोषो निहितोऽभूत् । विदेशीया विद्वांसस्त्वाश्चर्यमावहन् यद्धि स तु सरलसरलं सर्वजनम मान्यस्तरं न्यवसत् परं विचारप्रौढ्यां यदा ते (विदेशीया) स्वात्मानं जनात्तस्मात्सरलादपेक्षयातीव हीनमिवोपालक्ष्यंस्तदा तेषां शिरः श्रद्धावनतं समभूत् ।

राधाकृष्णमहाभागो जातुचित् क्रोधावेशवशं नापागच्छत् । प्रथमदर्शन एव हि तस्य कोमलमधुर-मृदुल-स्वभावस्य परिचयो भवति स्म । स सर्वेषामेव कथनं शृणोति स्म, प्रश्नानामुत्तरं च सावहितं प्रयच्छति स्म । यदि वयमेतद्वदेम यत् स स्वजीवनेऽनैकमपि जनं स्वशत्रुं मेने, न च केनापि सह शत्रुताया व्यवहारं चक्रे, तदा नयमतिशयोक्तिः स्यात् । इत्थं स खल्वजातशत्रुरासीत् । भारतदेशस्य राजधान्यां देहल्यां तस्य साक्षात्कारो मिलनं च सर्वतः सुलभमनायाससाध्यं च भवति स्म । तन्निवासस्थलं देहलीयात्रिणां तीर्थीभूतमिवासीत् । तद्भृत्याश्चैवमवदन्–'अस्माकं राष्ट्रपतिस्तु साधुर्महात्मा च वर्वर्त्ति, न स कदापि कस्मा अपि प्रकुपितः ।'

रूसदेशे भारतराष्ट्रस्य राजदूतरूपो राधाकृष्णमहोदयस्तस्थौ तदा तस्य सुमहानेव सम्मानः समभूत् । स्वर्गं गतो मार्शलस्तालिनमहाशयो वारद्वयं राधाकृष्णमहाभागेन सह साक्षात्कारं विदधे । स हि राधाकृष्णस्य विचारस्वातन्त्र्यस्य बह्वादरं कुरुते स्म । स किलैकदा श्रद्धाभावं समभिव्यञ्जयन् कथयामास–"द्वाक्तरवर्यो राधाकृष्णो मानवतायाः कृते कष्टानि सहते तथा च सत्येन हृदयेन भाषते ।" अथ ब्रिटिशराष्ट्रस्य भूतपूर्वो मन्त्रिवर्यः श्रीचर्चिलमहोदयोऽपि चास्य श्लाघाशंसनं विना न तुतोष– "अहं हि प्राध्यापक श्रीराधाकृष्णमहाशयं व्यक्तिगतरूपेण परिचिनोमि । स भावावेशबाह्यो नास्ते । यदा स मोलोतोवेन, स्तालिनेन च साक्षात्काराय सङ्गच्छते, तदा विश्वस्यास्य विभाजकानि कारणानि न कदापि विस्मरति । नाहं तदपेक्षयाधिकतरं श्रेष्ठमन्यं कर्मापि जन जाने यो हि विश्वस्य कल्याणपक्षे सततं चिन्तयन् स्यात् ।" अथ च सेनापतिर्नजीवमहाशयो राधाकृष्णस्य व्यक्तित्वविषये प्रोक्तवान्–"द्वावतरवर्यो राधाकृष्णमहाभागो महामानवोऽस्त्येकः । स किलोच्चादर्शानां शांतिप्रियो जनो वर्तते ।" राष्ट्रपिता महात्मा गान्धिः सन् १९४१ ई० वर्षे काशिहिन्दुविश्वविद्यालयस्य रजतजयन्तीमहोत्सवावसरे तस्यागाधगम्भीरामपारां च विद्वत्तां श्लाघमाण उन्मुक्तकण्ठमुवाच–"न हि सर्वे जना मालवीयसदृशा वा सरराधाकृष्णसमा वा भवितुमर्हन्ति ।"

मिस्रदेशस्य महादार्शनिक. प्लेटोनामा स्वकीये विश्वविख्याते "गणतन्त्रम्" इति ग्रन्थे लिलेख– "यावद्दार्शनिकाः शास्तारो न भवन्ति, यावच्च शासका दार्शनिका न भवन्ति, तावद् विश्वस्मिन् शांतिः सुरक्षा च स्थापयितुं न शक्यते ।" यदि चाद्यत्वे प्लेटोमहाशयः संसारेऽस्मिञ्जीवन्नभविष्यद् यद्धि तस्य चिरस्वप्नानुसारमिदानीं यावद्घटिते

विश्वस्येनिवृत्ते भारतीयदार्शनिकसार्वभौमस्य राधाकृष्णमहाभागस्य व्यक्तित्वे न्यूनान्न्यूनमपि चैकस्य दार्शनिकशासकस्य अभ्युदयस्तुत्रभवैव । कियद्वर्षेभ्य पूर्वं यदा राधाकृष्णमहोदयो विश्वसौहृदस्य सन्देशनादाय अमरीकाँ जगाम तदा तत्रत्या नागरिका प्रजाजनास्तस्य तथाविध स्वागतमकार्षु – ‘सर्वपल्ली राधाकृष्ण प्लेटोमहाशयस्य स्वप्नानां प्रतीकमिव स्ते ।’

स एव राधाकृष्णमहाभाग एकस्य ग्रामीणस्य बालकस्य अगतानादभ्युत्थाय विश्वस्य विचारससारस्य भारतस्य राष्ट्रपतिस्तथा राष्ट्रसङ्घस्य शांतिपरिषदोऽध्यक्षश्च बभूव । शिक्षितसमुदाये तन्नामग्रहण मालवीयमहाभागस्य, महात्मनो गान्धेर्विश्वकवेर्गुरुवरस्य रवीन्द्रनाथस्य तथा जवाहरलालनेहरूमहोदयस्य पङ्क्तौ क्रियते । तदेतत् कथन सत्यमेवास्ते– यदा महात्मा गान्धिर्देशस्यास्य सद्विवेकस्य प्रतिनिधित्व करोति कवीन्द्रो रवीन्द्र सस्कृते प्रतिनिधित्व करोति तथाचार्यवर्यो राधाकृष्णमहाभागोऽत्युच्चतया भारतदेशस्य विचारसम्पदानां प्रातिनिध्य कुरुते ।”

मामाह्वयति तटेऽलम्

श्री डा प्रमथनाथपाण्डेय

किञ्चिद वदति हसति लतया सह विहरति वनेऽमिताभ ।
वलयाश्लिष्टमनाकहमरणौ रचयति गृह श्रिताभ ।
वास किमपि वसानोऽजस्र नृत्यति कोऽपि सहेलम् ।।१।।
मामाह्वयति तटेऽलम् ।।

मुखसौन्दर्यसरसारमदभ्र तनुते शुभ वितानम् ।
छटा नयनयोरविरलममल किरति विभाम्लानम् ।।
लावण्यामृततृप्तमानस मदयति जन धृतेलम् ।।
मामाह्वयति तटेऽलम् ।।

गायति सरसभावनापेशलवेदगीतिसन्दोहम ।
क्षपयति करुणास्निग्धदर्शनै राशीकृतभ्रमाहम् ।।
छविधारयाप्याययति मधुर जनयति रति महेलम् ।।३
मामाह्वयति तटेऽलम् ।।

चरितमनल्प दिशति पुनानो जन प्रमोदपरीतम् ।
उद्घाटयति रहस्यकपाट कृन्तति कर्मातीतम् ।।
स्वान्ते सुवति कल्पनालोक लोकबोधमतिवेलम् ।।४
मामाह्वयति तटेऽलम् ।।

सलिले क्रीडति नव्यविधाभी रमयति बालसमूहम् ।
क्वचित् प्रसूते नन्दकेलिगृहमचिर ललित व्यूहम् ।।
भङ्गया तिष्ठति मधुरवचोभिश्चित्त हरति सुवेलम् ।।५
मामाह्वयति तटेऽलम् ।।

पूर्वतोऽनुवृत्तः—

भू-स्वर्गः

श्री जगन्नाथ रिव्यू काश्मीर

अर्हद्वने यच्च महत्सरो वै पापं सशोक हरते जनानाम् ।
जलं च यस्माज्जलनालिकाभिर्विभज्यते श्रीनगराय स्वच्छम् ।।१५
राजा कनिष्कः स्वमहासभा यश्चकार बौद्धानुमतां तुरीयाम् ।
कि हीनयानशिवदो महान्नो यानो भवेद्वाभवदत्र वाद. ।।१६
वने निशाते जलनासिकाभि सुशोभिते पुष्पफलाढ्य स्वच्छे ।
नगाश्च नार्यो विहरन्ति सङ्घ श्वौ दिने प्रेमभरा सहस्राः ।।१७
पुष्पैः फलैश्शाद्वलवेदिकाभिर्जलप्रपातैश्च सुवाटिकेयम् ।
द्वारद्वयाभ्यां द्विपथानुगाभ्यां दूर्वामयैः सप्तपदैः स्वपत्यु. ।।
गृहं प्रयान्तीव विवाहकाले सुगन्धियुक्तं श्वसनं श्वसन्ती ।
वेशं भजन्ती नयनाभिरामं मुलंकृता कश्यपनन्दिनीव ।।१८—१९
निशातसंज्ञा डलमूर्ध्निभागे सुवाटिकाभाग्यवतां सुभोग्या ।
काश्मीरदेशे स्वरति क्रमाय सोपानभूमिरिव निर्मिता सा ।।२०
जले स्थले वात्र नगे वने तथा श्रीराजलक्ष्मीश्चिरमत्र संस्थिता ।
श्रीसिद्धिपीठे मुनिवर्यसेविते श्रीशारदा चापि जने जने स्थिता ।।२१
प्रादुर्बभूवात्र मतं च शैवं योध्यात्मवादस्य पराविभूतिः ।
गगावतारश्च बभूव पूर्वं मा चन्द्रमौलेश्च विहारभूमि ।।२२
गगाव गुप्ता वसुगुप्तपादैर्विराजने पर्वतपादमूले ।
गुप्तोक्तशैवेन विभाति विश्व शिवादभिन्नं तमसः परस्तात् ।।२३
वेदान्तशैवागमयोऽत्र वादो बभूव पूर्वं वसुगुप्तभूमौ ।
शिवोऽत्र शक्तौ प्रतिभासते वै मणौ यथा दीपशिखाविचित्रा ।।२४
आचार्यवर्यो वसुगुप्तभूमौ स्थितोऽधुना लक्ष्मणसन्तवर्यः
शैवागमस्यात्र करोति चर्चा शिष्यै. समन्ताद्बहुभिर्वृतो यः ।।२५
आखूनशाहोऽत्र महेन्द्रजाल विद्बभूव पूर्वं गिरि कुक्षि निर्मिते ।
गृहे वसन्य. प्रमदा जनावृते संकीर्त्यते पर्यमहल्लसंज्ञया ।।२६
उत्तुङ्गतालै. परितः समावृतं तालीयमञ्जिल समाह्वये नगे ।
तत्कर्णमिहस्य नु स्वास्थ्यमन्त्रिणो विराजते पर्वतकुक्षिगं गृहम् ।।२७
सुवाटिका मुग्धलनिर्मितात्र सुनिर्मलैः स्वादुजलैरुपेता ।
सुशोभिता राजगृहेण चश्माशाहीसमाख्या डलपूर्वभागे ।।२८

१४–४–७५ दिनांके आर्यसमाजस्य शताब्दसमारोहे कविसम्मेलने निर्वाचितम्

गुरुपादोदकम्

श्री जगन्नाथ विश्नू शास्त्री

(१)
दयानन्दाम्बोधेः समुदितवती ज्ञानलहरी
प्रविष्ठा वेदात्मप्रमदविपिने मार्गणपरा ।
प्रतिष्ठां संयाता विरजगुरुपादोदरुरसै-
र्विकासं संप्राप्ताभिनवशिवसंकल्पचयनात् ।।

(२)
स्मारं स्मारं गुणगणनिधिं ज्ञानविज्ञानमूर्तिं
ध्यायं ध्यायं शमदमपरं ध्वांतपाखण्डभानुम् ।
पायं पायं गुरुवरदयानन्दपादोदकं यौ
श्रद्धाहंसौ परहितपरौ ज्ञानमार्गे कृतार्थौ ।।

(३)
सोऽयं महावैदिक धर्मगोप्ता
स्वातन्त्र्य राज्यस्य पराविभूतिः ।
विद्यावतारो गुरुदेववर्य-
श्चकार, 'सत्यार्थप्रकाशदीपम् ।

(४)
सुकुमारमतीञ्छिष्यान्प्रबोधयितुमञ्जसा ।
चकाराभिनवं शास्त्रं वेदभाष्य दयानिधिः ।।

(५)
दयानन्दर्षिः संजातष्टंकारनगरे शुभे ।
चतुर्वेदवपुः साक्षात् त्रिदण्डी यतवाक्शुचिः ।।

(६)
विचचार महीमेतां स्वातन्त्र्यस्य विभावसुः ।
पाखण्डप्लावको येन हरिद्वारसमीपतः ।।

(७)
ध्वजः प्रसारितस्तत्र मूर्तिपूजापराङ्मुखाः ।
बभूवुः पण्डिताः सर्वे तस्य दिग्विजये तदा ।।

(८)
शोभामर्हन्ति तेषां वै जन्मवृत्तं महात्मनाम् ।
सुकर्मभिश्शिवो मार्गः मंचितो यैर्महात्मभिः।।

(९)
दयानन्दाङ्घ्रिपद्मस्य मधुपौ मधुपाविव ।
श्रद्धाहंसौ गुरोर्भक्तिं समवायतुरादरात् ।।

(१०)
धन्यं यशस्यमृषिवर्यजन्म-
नामाङ्कितं तद्धृदये जनानाम् ।
तत्पादपद्मभ्रमरा भवन्ति
जना भवेऽस्मिञ्छ्रद्धया सदैव ।।

(११)
क्वाहं मन्दमतिः क्व सा स्वाचार्यस्य विशालता
शोभामर्हति तस्यैव जीवितं यस्य निर्मलम ।।

(१२)
अहो भाग्यमहो भाग्यमार्यावर्तनिवासिनाम्
यदनुग्रहेन संपूर्णश्शताब्दः प्रतिपद्दिने ।।

(१३)
पञ्चसप्ताधिकेऽप्यूनविंशे क्रिस्तोश्शुभे दिने ।
आर्यसमाजस्य शताब्दोऽद्य समाप्तो नववत्सरे

(१४)
श्रद्धाञ्जलिं समाजस्य शताब्द्यां कविसंगमे
दयानन्दांघ्रिपद्मेषु जगन्नाथः समर्पति ।।

—०—

मानव सौभ्रात्रम्

श्री तेलकपल्लि रामचन्द्र शास्त्री

(१)

सौभ्रात्रं यदि लभ्यते सुजनता साध्यं परं मानवै-
र्ये स्तेषां न भवंत्यकीर्तिनिलया. कामादयो दुर्गुणाः।
दम्भाद्याश्च ततो भवंत्यनुपमंश्च श्रेयसं लघ्वत
स्सौ भ्रात्रं लभतार्थदं हितकरं भो! भारतीया जनाः॥

(२)

सौभ्रात्रेण समत्वधीस्सुमहिता तस्याः कृपा प्राणिषु
दातृत्वं तत आदरो जनकृतस्तस्माद्यशस्सुस्थिरम्
तस्मात्सौख्यमुदेत्यनन्य सुलभं पुंसामतो धीमतां
तत्सौभ्रात्रमलं लभध्वमतुलं भो ! भारतीया जनाः॥

(३)

पार्थक्योपगतौ जनाहितकरौ सौभ्रात्रमाहात्म्यत
स्सायुज्यं समुपेत्य गन्धकरसौ शुद्धौ सुयोगान्वितौ
यल्लोकामयजालवञ्चनचणौ जातावतस्सुस्थिरम्
सौभ्रात्रं भजतार्थदं हितकरं भो ! भारतीया जनाः॥

(४)

नाना शास्त्रकृतश्रमैः कुशलिभिर्नित्यैक पत्नीरतैः
कौन्तेयैरहिताः परस्परपतत्सौहार्दहीनाः खलाः
सौभ्रात्रेण रणे हि येन कुटिलास्सर्वेजिता कौरवा
स्तत्सौभ्रात्रमलं लभध्व मधुना भो ! भारतीया जनाः

(५)

रामस्सत्यपराक्रमोऽपिबलवान्शस्त्रास्त्रयुक्तोऽपि स-
न्सुग्रीवादिसमस्तवानरततेस्सौभ्रात्रमेकं विना।
सौमित्रेश्चदशाननंजितजगद्घर्षंतुंयतो नाऽशकत्
तत्सौभ्रात्रमलं लभध्वमतुलं भो ! भारतीया जनाः॥

(६)

अस्मद्देशनसौ समाक्रमण धीलब्धाऽन्य प्राभव !
त्यक्तप्राणि भयान्हिंसाविरहितान्देशापहारोद्यतान्
सौभ्रात्रेण वयं जयाम सहितायेनद्विपास्सायुधान्
तत्सौभ्रात्रमलं लभध्व मधुना भो ! भारतीया जनाः

(७)

अंभोजं रविणा जलेन च समं सौभ्रात्र मेत्यान्वहम्
स्वच्छन्दविकसल्लसज्जनशिरोधार्यं सुगधान्वितम्
पूजार्हं भवुपानिधिप्रियकर जातान्यतस्सुस्थिरम्
सौभ्रात्रं नानार्थनिदिधदमलं भो ! भारतीया जनाः

(८)

मेनान्यांशुमुवायादेत्य कुणत्री सौभ्रात्रमेक मिखी
ज्योतिश्को विबुधो यथा कृषिकृतां वृष्टि मुदावेदयन्
सानदं गह पूज्यते बुधजनैर्नित्यं कुमारेण तत्
सौभ्रात्रं लभतार्थदं हितकरं भो ! भारतीया जनाः॥

(९)

ये सौभ्रात्रमुपार्जयंति कुशलास्ते धैर्यसपद्युता-
स्तन्वानाबहुदुर्गुणा विषुरयाच्छार्दूलविक्रीडितम्
स्नाताश्शान्ति सप्तितौ सुख सुधालिप्ताश्च जीवंत्यत-
स्सौभ्रात्रं लभतार्थसिद्धिदमलं भो! भारतीया जनाः॥

मई १९७५ से आगे--

महर्षि दयानन्द की विश्वदर्शन को देन

(Contribution of Dayananda to world philosophy)

जयदेव वेदालंकार

अष्टम अध्याय

महर्षि दयानन्द जी के अनुसार मुक्ति के अन्दर जीवात्मा आनन्द को प्राप्त करता है। मीमांसक का यह कहना कि मुक्ति के अन्दर जीवात्मा आनन्द का उपभोग नही करता यह ठीक नही। क्योंकि मीमांसक इस में हेतु यह देता है कि वहां इन्द्रियां नही होतीं। मोक्षानन्द इन्द्रियो के सुख से भिन्न है क्योंकि इन्द्रियों के सुख अस्थायी है और मोक्षानन्द जीवात्मा को जब तक प्राप्त होता है तब तक वह मुक्ति में रहता है। क्योंकि वेद और उपनिषदों में भी मुक्ति अवस्था मे आनन्द को स्वीकार किया है। १

न्याय दर्शन के अनुसार मोक्ष दुःख के पूर्णाभाव की अवस्था है वे इसे अपवर्ग कहते है अपवर्ग का तात्पर्य यह है कि शरीर और इन्द्रियों के बंधनो से आत्मा का मुक्त होना। दुःख से मनुष्य तभी छूटता है जबकि वह ग्रहण किए हुए जन्म को मनुष्य छोड दे और दूसरे जन्म को न ग्रहण करे। कई दार्शनिको का कहना है कि मोक्ष मे आत्मा को नित्य सुख की प्राप्ति होती है किन्तु उन का कहना इनकी दृष्टि मे तर्कयुक्त नही मालूम देता। परन्तु यह धारणा न्याय दर्शन के सूत्रकार की थी नहीं, ऐसा स्पष्ट प्रतीत नही होता। हाँ, न्यायदर्शन के भाष्यकारों का ऐसा ही निश्चितमत है। इनके अनुसार वहाँ नित्य सुख की प्राप्ति होती है इस विषय मे कोई भी प्रमाण प्राप्त नही होता है। नित्य सुख की अभिव्यक्ति में कोई हेतु होना चाहिए जिसमे कि वह ज्ञान उत्पन्न हो सुख की तरह नित्य ही यदि ऐसा कहा जाये तो ससारी और मुक्त पुरुष में कोई भेद नही रह जाता है जिस प्रकार मुक्त पुरुष नित्य सुख तथा उस के ज्ञान से उत्पन्न है उसी तरह ससारी पुरुष में भी ठहरता है क्योकि दोनों ही सुख नित्य है दोनो को नित्य मानने पर धर्माधर्म से उत्पन्न सुख-दुःख के प्राप्ति काल मे नित्य सुख तथा उसके नित्य ज्ञान का भोग पक्ष मे ही ग्रहण होना चाहिए।

सुख को नित्य और उसकी अभिव्यक्ति को अनित्य मानने मे कोई हेतु बतलाना चाहिए इस प्रकार की अभिव्यक्ति में आत्मा और मन का सयोग तो कारण नही बन सकता है इस लिए कोई दूसरा कारण मानना पडेगा। अगर धर्म को नित्य सुख की अभिव्यक्ति की अनित्यता मे अन्य निमित मानेंगे तो इस के लिए भी कोई हेतु होना आवश्यक है। जिससे यह धर्म निमित्त के रूप मे पैदा हो सके। यदि योग सामाधिजन्य धर्म को हेतु माना जावे तो उस धर्म में कार्य व्यापार के अभाव मे सर्वक्षय हो जाता है। सर्वक्षय होने पर सुख की अभिव्यक्ति की भी निवृत्ति हो जायेगी। यदि ऐसा कहो कि सुख तो है परन्तु धर्मक्षय से उसका अनुभव नहीं बन सकता। ऐसा मानने पर सुख है और सुख नही है इन दोनो में कोई अन्तर नहीं रह जावेगा।

१– यत्र आनन्दाश्च मोदाश्च – –

उत्पत्ति धर्मक होने से वह धर्मशील नहीं होता ऐसा अनुमान नहीं किया जा सकता क्योंकि ऐसा सर्वमान्य है कि जो जो उत्पत्ति धर्मक हैं वे अनित्य भी हैं१. संवेदन हेतु के नित्य मानने पर मुक्त तथा संसारी में कोई अन्तर ही न रह जावेगा ऐसा पहले हम बतला चुके हैं जिस प्रकार मुक्त पुरुष का सुख व सुख संवेदन हेतु की नित्यता से नित्य है क्योंकि वहाँ सुख संवेदन की समाप्ति नही होती । यही हालत संसारी पुरुष के सुख व सुख संवेदन की माननी पड़ेगी । इस प्रकार मानने पर धर्माधर्म से उत्पन्न सुख-दु.ख की उपलब्धि-काल में नित्य सुख व नित्य संवेदन का यौगपद्य ही स्वीकार करना पड़ेगा ।

यदि उस संवेदन में देहादि सम्बन्ध प्रतिबन्धक हेतु हैं तो शरीर आदि के उपभोगार्थ होने से प्रतिबन्धक नही बन सकते तब मुक्त सुख की नित्यता की तरह देहादि के नित्यत्व का अनुमान करना होगा जो कि शास्त्र के विरुद्ध है। कई के मत में संसारी मुक्त पुरुष का शरीरादि सम्बन्ध नित्यसुख संवेदन हेतु का प्रतिबन्धक है । अतः संसारी और मुक्त पुरुष के सुख संवेदन में समानता नहीं परन्तु यह बात ठीक नहीं, क्योंकि उसी शरीर को पहले उपभोग साधन व फिर प्रतिबन्धक मानना ये दो बातें एक साथ नहीं बन सकतीं ।

यदि कोई आगम भी है कि मुक्त पुरुष को सुख होता है तो सुख शब्द वहाँ आत्यन्तिक दुःखाभाव में प्रयुक्त हुआ माना जावेगा । क्योंकि प्रायः लोक में दु खाभाव में सुख शब्द का प्रयोग देखा जाता है जैसे कि एक मनुष्य धूप में भार उठाकर चलता हुआ किसी वृक्ष की छाया पाकर बैठ जाता है और बोझ नीचे रख देता है और कहता है कि मैं सुखी हो गया हूँ । इस उदाहरण में भी केवल दु खाभाव ही है । क्योंकि वह व्यक्ति भार से दु ख अनुभव कर रहा था वृक्ष के नीचे आने से और भार उतारने से उक्त दु.ख की निवृत्तिमात्र है न कि किसी नवीन सुख की प्राप्ति । इसके साथ ही नित्य सुख में राग के बने रहने पर मोक्ष की प्राप्ति नहीं होगी । क्योकि राग से बन्धन होता है । इस विषय में सब एक मत है अर्थात् यदि कोई मनुष्य मोक्ष की इच्छा सुख की प्राप्ति के लिए करेगा तो सुख के प्रतिराग होने से उसको मोक्ष की प्राप्ति नही होगी ।

उपरोक्त हेतुओं से हमें ज्ञात होता है कि मोक्ष में दु.खाभाव के साथ साथ सुखाभाव भी होता है, मोक्ष में जो दु.खाभाव होता है उसका यह तात्पर्य नही कि कुछ काल के लिए दु ख दूर हो गया । जैसा कि अत्यधिक निद्रा के समय या किसी शारीरिक अथवा मानसिक रोग के कष्ट से मुक्त होने के पश्चात् होता है। इस अवस्था में तो दु:ख का सब प्रकार से अन्त हो चुका होता है । इस दु ख विनाश के लिए आत्मा और शरीर का सम्बन्ध तोड़ना ही पड़ता है तभी तो प्रिय और अप्रिय वस्तुओं से सम्पर्क टूटेगा । इसी लिए गौतम मुनि ने कहा है दुःख जन्म आदि का अत्यन्त छूटना अपवर्ग है१ । यह नितान्त अनुभूति हीन या बिलकुल संसार से परे की अवस्था है । धर्म ग्रंथों में इसे अभय, अजर और मृत्यु से रहित पद की अवस्था कहा है२ ।

१- यत् यत् उत्पत्ति धर्मकं तत्तत् अनित्यम्॥

१- तदत्यन्त विमोक्षोऽपवर्ग १।१।२२ न्यायदर्शन ।

२- अभयमजरमृत्युपदम् (धर्मशास्त्र) ।

उपरोक्त कथनानुसार मुक्ति मे दुःखाभाव होता है ऐसा कहा गया है । परन्तु यदि इस विवेचन का सूक्ष्म दृष्टि से अवलोकन किया जाये तो सुख की प्राप्ति अथवा दु खाभाव, ये दोनों पद विरोधी नही प्रतीत होंगे. क्योंकि न्याय दर्शन ने मीमाँसक की तरह यह नहीं माना कि वहाँ इन्द्रियाँ नही हैं इस लिए सुख नही होगा अपितु जन्म व मरण रोग अपना व्याधि से छूट कर जीवात्मा परब्रह्म के आनन्द में विचरेगा । जब परब्रह्म के आनन्द मे जीवात्मा विचरेगा तो वहाँ पर उसे मोक्षानन्द प्राप्त नहीं होगा ऐसा कहना कुछ उचित सा प्रतीत नहीं होता । किसी व्यक्ति के भार वाले दृष्टान्त से भी यह सिद्ध होता है कि उसके भार के उतारने पर उसे सुख और शीतल छाया की अनुभूति होती है चाहे वो दु.ख का अभाव ही क्यों न हो । आनन्द की अनुभूति तो होती ही है। इन दोनों प्रकार के विवेचनों में हमे केवल कहने मात्र का अन्तर दिखाई देता है ।

वैशेषिक दर्शन मे मुक्ति का वर्णन न्याय दर्शन की ही तरह है । अत: उसका यहाँ पर वर्णन करना प्रबन्ध के कलेवर को ही बढानामात्र होगा ।

साँख्य दर्शन के अनुसार जब तीनों दु खों का अत्यन्त नाश हो जाता है तो आत्मा की कृतकृत्यता होती है१ । आत्मा का प्रकृति के सम्पर्क में आना शरीरादि का धारण करना भोग और अपवर्ग के लिए होता है । भोगों को भोगता हुआ आत्मा आध्यात्म की ओर प्रवृत होने पर जब स्वरूप का साक्षात्कार कर लेता है तो कृतार्थ हो जाता है । अपने लक्ष्य को पहुँच जाता है । बहुत सारे दुःखों की निवृत्ति तो भोगकाल में ही हो जाती है किन्तु दूसरे दुःख आ घेरते हैं । आत्म साक्षात्कार हो जाने पर प्रकृति से आत्मा का सम्बन्ध छूट जाता है तब दुःखों का आना जाना हमेशा के लिए छूट जाता है । यही मुक्त अवस्था है यही पूण पुरुषार्थ है ।

इसपर आक्षेप किया जा सकता है कि दुःख निवृत्ति के साथ सुख भी चला जाता है तब दुःख निवृत्ति को मुक्ति न मानकर सुख की प्राप्ति को मुक्ति क्यो न माना जाये ?

इस आक्षेप के उत्तर मे कहते है कि जिस प्रकार मनुष्य को दु ख से द्वेष होता है उसी प्रकार की अभिलाषा सुख को पाने की नही होती१ । संसार मे चारों ओर दु ख ही दु.ख पाते हैं अतः मनुष्य चाहता है कि दुःख दूर हो जाये । दु ख दूर होने पर आगे सुख मिले या न मिले परन्तु उस विषय में उसकी भावना नही होती । साँख्य में सुख शब्द विषय वासनाओं की ओर संकेत करता है । विषय वासनाओं का प्राप्त होना भोग पुरुषार्थ का मिलना है न कि मोक्ष पुरुषार्थ का । अत. सुख की अभिलाषा करना मोक्ष के पास से दूर जाना है । दूसरी बात यह है कि सुख की मात्रा बहुत ही थोडी है । किसी ने तो इसको नही के बराबर कहा है । सुख की इच्छा करना भोग की दृष्टि से धन सम्पत्ति की इच्छा करना है । धन एकत्रित करने के लिए लाखों प्रकार के क्लेश सामने आते हैं । अतएव मोक्ष की इच्छा वाले दु.ख निवृत्ति की भावनाओं के साथ इस सुख को घृणास्पद दृष्टि से देखते हैं । कहीं पर यदि मामूली

१– अत्यन्तदुःख निवृत्या कृतकृत्यता (सांख्य दर्शन ६।५) ।

१–यथा दुःखात् क्लेशः पुरुषस्य न सुखादभिलाषाः (साँख्य ६।६)

सा सुख होता भी है तो वह दु.खों से घिरा होता है। इसके अनुसार दुःखों की निवृत्ति हो जाने पर ब्रह्मानन्द की प्राप्ति स्वतः हो जाती है। दुनियाँ के यदि सारे सुख भी इकट्ठे हो जाये तो भी उस मोक्षानन्दानुभव का मुकाबला नही कर सकते। इस पर यदि कोई कहे कि आत्मा तो निर्गुण है असंग है फिर उसका सुखी और दुखी होना कैसा१? जो स्वभाव से सुख दुःख से परे है उसके लिए दुःख की निवृत्ति का क्या तात्पर्य है। इस प्रश्न के उत्तर में कहते है कि सुख दुःख आदि सत्व रजस् आदि के विकार तो है ही किन्तु इनकी अनुभूति आत्मा को होती है। इस का कारण अविवेक है यह अविवेक तब तक बना रहता है जब तक पुरुष को यथार्थ स्वरूप का साक्षात्कार न हो जावे। यह भी पुरुषार्थ का एक रूप है। पर पुरुषार्थ की प्राप्ति के लिए अविवेक को हटाना होता है। अतएव परम पुरुषार्थ अवस्था दुःखरहित अवस्था है।

पुरुष को जब अपने स्वरूप का ज्ञान हो जाता है तो वह फिर प्रकृति के सम्पर्क में नहीं आता। यही अपवर्ग है। जो आत्मा मुक्त नही हुए प्रकृति उनसे उदासीन नही होती वह बराबर कार्य रूप में परिणत होती जाती है। विवेक ज्ञान हो जाने से जो आत्मा मुक्त हो जाता है उसके लिए प्रकृति की प्रवृत्ति का कोई प्रयोजन नही होता। अतः उनकी दृष्टि से कह दिया जाता है कि प्रकृति अपनी प्रवृत्ति से विरत हो गई। जिन को विवेक ज्ञान नहीं होता उसके लिए संसार इसी तरह चलता जाता है। मुक्तात्मा पर प्रकृति का प्रभाव उसी प्रकार नही पड़ता जैसे एक नर्तकी का तृप्त हुए सभासदों पर नही पड़ता। नर्तकी जब नृत्य करने के लिए रंगमंच पर आती है तो दर्शकगण बहुत उत्सुकता से उसके नृत्य की प्रतीक्षा करते है। किन्तु जो उसके नाच से तृप्त हो चुके होते है उन मे उत्सुकता लेशमात्र भी नही होती। वे सभा स्थान को छोड कर चले जाते है और उस नृत्यप्रदर्शन से कोई सम्पर्क नही रखते यद्यपि अब भी नर्तकी नृत्य दिखाने मे संलग्न है यह बराबर अपने काम में प्रवृत्त है। किन्तु जो उस की कला विशेषता को जान चुका है वह नर्तकी के लिए किसी प्रकार की रुचि नही रखता१।

उपरोक्त उदाहरण को सूत्रकार दूसरे रूप से समझाता है। जैसे एक कुल बधू अपने किसी बडे दोष के प्रकट हो जाने पर लज्जाशील बन जाती है और अपने स्वामी के सामने तक नही आती ऐसे ही प्रकृति अपने दुःखात्मकता आदि दोषों को जान लिए जाने पर मुक्त आत्मा के सामने नही आती जब आत्मा मुक्त हो जाता है अथवा आत्मा को विवेक हो जाता है तो उसी समय शरीर नष्ट नही होता। विवेक ज्ञान इकट्ठे किए हुए कर्मों का तो नाश कर देता है किन्तु जो कर्म प्रारम्भ कर चुका होता है उसका नाश नही कर पाता। उनका नाश तो फल के बाद ही होता है। अतः जब शुरु किए हुए कर्मों से उत्पन्न भूख प्यास निन्द्रा आदि का क्रम चलते रहने से विवेक अवस्था में भी कुछ भोग की अवस्था चलती रहती है। क्रमशः

१—असंगोहि अयंपुरुषः साक्षीचेतः केवलो निर्गुणश्च (सांख्याकारिका)

१—नर्तकीवत् प्रवृत्तस्यापि निवृत्तिश्चारितार्थ्यात्। (३।६९ सांख्य दर्शन)

'निर्व्रणानि अगदानि च फलानि प्राहयेत्

—चरक

फल देख—जाँचकर खाइये

आचार्य ब्रह्मदत्त शर्मा आयुर्वेदालंकार, २८५।१३।सी-४बी, जनकपुरी, नयी दिल्ली ५८

बात लगभग ४० वर्ष पुरानी है। इन पंक्तियों का लेखक तब गुरुकुल विश्वविद्यालय काँगड़ी (हरिद्वार) के आयुर्वेद महाविद्यालय का छात्र था। प्रिन्सिपल थे, श्री डाक्टर गोपाल रामचन्द्र ताम्बे—राजकीय सेवा से निवृत्ति प्राप्त कुशल सर्जन—शल्यशास्त्री। वय से 'साठा सो पाठा' के ज्वलन्त प्रतीक एवं कर्मठता मे युवको को भी लजा देने वाले। वय-ज्ञान एवं प्रौढ अनुभव मे वृद्ध, परन्तु आदर्शो एव संस्थाविकास—मनोरथो मे युवा। और इतने पर भी स्वप्नलोक-विहारी विहंगम नहीं, अपितु ठोस धरातल के पदचारी एवं सीमाओं—समस्याओं—कठिनाइयों के प्रति पूर्णतया सजग। धुन के धनी और बाधाओं से जूझने—जीतने की अजेय उमंग से पूर्ण। उनका कर्मकलाप एवं जीवन हम सभी के लिए प्रेरणा एवं जीवनादर्श का स्रोत था। निपट भोर में उठने के बाद से रात्रि तक, मध्याह्न भोजन एव आध घण्टे के विश्राम के अतिरिक्त, खाली नहीं रहते थे और अपने साथ सभी को किसी न किसी काम में जुटाये ही रखते थे।

अत्यधिक सक्रिय, कर्मठ, कर्मदक्ष एवं क्रियात्मक व्यावहारिक (तथापि सहृदय) होने के साथ-साथ डा० ताम्बे आहार-विहार-व्यवहार की छोटी-छोटी बातों के प्रति भी पूर्ण सजग रहते थे। उन्हीं की एक छोटी सी, परन्तु शिक्षाप्रद, घटना नीचे की पंक्तियों में प्रस्तुत की जा रही है—

हाँ तो, बात लगभग ४० वर्ष पुरानी है! दिन यही शायद ग्रीष्म—ऋतु के थे। कालेज से सम्बद्ध 'श्रद्धानन्द सेवाश्रम' के 'शल्यक्रियाभवन' (आपरेशन—थियेटर) मे आपरेशनों से निपटने के बाद तथा समीपवर्ती गंगनहर में तैरकर ताजगी प्राप्त करने के बाद लगभग २॥ बजे जब डा० ताम्बे भोजन की मेज पर बैठे तब उनके सामने अन्यान्य आहार के अतिरिक्त एक स्वस्थ सुपुष्ट सुपक्व पपीता भी परोसा गया। उस पपीते को जब उन्होंने आधा काटा तो उसके मध्यवर्ती बीजावकाश में एक उभार पाया। उन्होंने उसे नहीं खाया और तत्काल दोनों गोलार्द्धों को यथाविधि एक मर्तबान में सुरक्षित करके समूचा विवरण लिख दिया। सम्भवतः अभी तक कालेज के 'विकृति'—सग्रहालय में वह नमूना विवरणसहित रखा होगा।

उस पपीते को न खाने का कारण? बिना खाये सुरक्षित रखने का प्रयोजन? और सुरक्षा-मर्तबान पर लिखित विवरण?—यह सब क्या था?

डा० ताँबे के अपने शब्दों में—'पपीते के भीतर का यह उभार 'अर्बुद' (ट्यूमर) है। अर्बुदग्रस्त यह पपीता विकृति-युक्त होने के कारण अखाद्य है और छात्रों को इस विकृति को दिखाने समझाने के लिए 'विकृति—संग्रहालय में पूर्ण विवरण के साथ रखा जा रहा है।

यह घटना तो बड़ी छोटी-सी है, परन्तु इससे मिलने वाली शिक्षा बड़ी महत्वपूर्ण एवं व्यापक है। शिक्षा का आधार यही है कि रोग एवं

विकृति से पूर्ण फल एवं अन्य भोजन शरीर में विकृति एवं व्याधि ही करेगा। अर्बुदयुक्त फल से शरीर में अर्बुद१, अतिवृद्धि (हाइपरट्रॉफी)२ अतिभूति (हाइपरप्लाजिया)३, विषाणुसंक्रमण४, अनूर्जता (ऐलर्जी)५ आदि विकार होने की आशंका है। अतः ऐसे फल का सेवन नहीं करना चाहिये।

'अर्बुद' एक विकृति है, जिसकी उत्पत्ति किसी चिरस्थायी क्षोभ के कारण शोथ प्रवृद्धि रूप वैकृत प्रतिक्रिया के रूप में होती है। और अर्बुद-जनक क्षोभ के अनेक ज्ञात-अज्ञात-कारणों में से विषाणु एक प्रबल एवं महत्वपूर्ण कारण है। ये विषाणु अत्यन्त सूक्ष्म होते हैं; यहाँ तक कि सूई की नोक के क्षेत्र में जहाँ अनेकों-सैकड़ों कोशाणु समा सकते हैं, वहाँ प्रत्येक कोशाणु के गात्र में हजारों लाखों विषाणु समा सकते हैं। इनके व्यास का मापन 'मिलिमाइक्रोन' (१माइक्रोन=१ मिलिमीटर का दस-लखवाँ भाग) की इकाई में होता है, इसीलिए इन्हें देख पाने के लिए बड़े शक्तिशाली 'इलैक्ट्रोन-माइक्रोस्कोप' की आवश्यकता पड़ती है यह विषाणु जहाँ इतना सूक्ष्म होता है वहाँ शक्तिशाली एवं धृष्ट भी बहुत होता है। प्रायः वायु-जल-दुग्ध-खाद्यपदार्थ धूल आदि के माध्यम से इसका प्रसार होता है। मक्खी-मच्छर-पिस्सू-खटमल-जूं आदि आदि वाहक कीटादिक भी इसके प्रसारमाध्यम का कार्य करते हैं, ऐसी भी कइयों की मान्यता है। तथा कई लोग स्वस्थ त्वचा में से भी इसका अन्तः प्रवेश सम्भव मानते हैं। विषाणु की एक अन्य विशेषता बहुत ही अद्भुत है। वह यह कि विषाणु की स्थिति सजीव निर्जीव तत्वों के सीमा-स्थल पर होती है, अर्थात् कुछ विषाणु तो ऐसे हैं जो सजीव होने के कारण सजीवता की इकाई 'अमीबा' के समान गति-सात्मीकरण-मलमं चन-प्रजनन-आदि जीवन-धर्मों से युक्त होते हैं तथा कुछ अन्य विषाणु रासायनिक द्रव्यों के स्फटिक बनाने की विशेषता रखते हैं। ऐसे सूक्ष्म-शक्तिशाली-व्यापक-धृष्ट-विविधधर्मी-विचित्र विषाणुओं के कारण मानस शरीर में होने वाली व्याधियों के कुछ उदाहरण ये हैं--

---

१. **'अर्बुद'** (ट्यूमर) का अर्थ है, नये तन्तु का ऐसा पिण्ड जो अपनी परिवर्ती रचनाओं से स्वच्छन्द रूप में बढ़ता और बना रहता है और जो शरीर के लिए उपकारी नहीं होता।'

२. **'अतिवृद्धि'** (हाइपरट्रॉफी) का अर्थ है, 'किसी अवयव या उसके किसी भाग के घटक कोशाणुओं के आकार-परिणाम में होने वाली अधिक वृद्धि या विकृत वृद्धि।'

३. **'अतिभूति'** (हाइपरप्लाजिया) का अर्थ है, किसी तन्तु के प्राकृत कोशाणुओं की प्राकृत व्यवस्था में रहते रहते वैकृत संख्यावृद्धि होना।' (Hyperplasia)।

४. **'विषाणु-संक्रमण'** (वाइरस-इन्फेक्शन, Virus-infection)

५. **'अनूर्जता'** (Allergy) एक प्रकार की अतिसंवेदनिकता है जिसके कारण अधिकांश व्यक्तियों के लिए हानिरहित सिद्ध होने वाले किसी द्रव्य के विपरीत किसी व्यक्ति में विशिष्ट प्रकार की अतिशयित एवं असामान्य प्रतिक्रिया होती है।

वातकफज्वर (इन्फ्लूऐंजा) १, शीतला २, रोमान्तिका ३ विस्फोटिका ४, कुक्कुरकास ५ पोलियो ६, अलर्करोग ७ या जलसन्त्रास ८, आदि। सज्वर कामला में पायी जाने वाली यकृच्छोथ ९, का मुख्य कारण विषाणु ही होता है। जहाँ अर्बुदजनक विषाणु की उपस्थिति या करतूत उस पपीते में स्थित अर्बुद से ही अनुमानित हो जाने के कारण हमने उस पपीते के त्याग द्वारा उस अर्बुद के अतिरिक्त तज्जनक विशिष्ट विषाणु से अपना बचाव कर लिया, वहां अन्य प्रकार के विषाणुओं के भी कुछेक चिन्ह उपलब्ध होते हैं और उन्हें देखकर हमें तत्-तत् विषाणु से बचाव के लिए उस फल-सब्जी-आदि का त्याग कर देना चाहिए। उदाहरणार्थ-बहुधा हम देखते है कि भिण्डी या तम्बाकू के पत्ते साफ फैले रहने के बजाय किसी-किसी पौधे में मुड़े-तुड़े-मुचड़े हुए से होते है या उनके पृष्ठ पर एकसम फैली हरीतिमा के बजाय चितकबरापन उत्पन्न हो जाता है, यह एक विषाणुजनित व्याधि है जिसे 'चित्रकुट्टिम-व्याधि' (मोजेक-डिसीज) १०, कहते हैं। ऐसे व्याधित पत्ते में से हम विशेष विधि द्वारा उस विषाणु के स्फटिक भी प्राप्त कर सकते हैं। ऐसी भिण्डी या तम्बाकू के सेवन से उस विषाणु का संक्रमण हो जायगा। सेव--अमरूद-आम आदि फलों में इस व्याधि के कारण चितकबरापन या चित्रकुट्टिम (मोजक)-रचना देखते ही हमें उसे त्याग देना चाहिए।

फलों-सब्जियों में व्याधियां केवल विषाणु के कारण ही नहीं होतीं, अपितु कुछ विशिष्ट वैकृत फफूंदियों ११ के कारण भी होती हैं। उदाहरणार्थ आलू में हरापन एक विशिष्ट फफूंदी से होता है, ऐसे आलू को नहीं खाना चाहिए। गेहूं तथा जई आदि शूकधान्यों में फफूंदी के प्रभाव से ही अर्गट १२ सदृश प्रबल विष उत्पन्न हो जाता है। पिछले दिनों महाराष्ट्र में जो राशन-वाला बाजरा खाने से जो वमन-अतिसार-उदरशूल-मूर्च्छा एवं मृत्यु तक के लक्षण व्यापक रूप में पाये गये थे, उनका भी कारण फफूंदी-संक्रमण ही था। मकई आदि में भी फफूंदी-सक्रमण से मसूड़े-जीभ-तालु-महास्रोतस में शोथ-पाक-छाले-आदि के दुष्परिणाम होते पाये जाते हैं। गले-सड़े आम-अलूचे-आलू-बुखारे-सेव-अंगूर-अमरूद आदि में भी इसी कारण विकारजनकता आ जाती है। फलों या सब्जियों के पृष्ठों पर या भीतरी मज्जा में अथवा छिलकों के ठीक नीचे ये फफूदियां हरे या सुनहले या पीले या श्यामल से वर्ण में स्थित होती हैं। अतः ऐसे वर्ण की अस्वाभाविक रूप में स्थिति को देख कर तथा गले-सड़े-पिलपिले स्वरूप को देखकर फफूंदी का अनुमान हो सकता है। सूक्ष्मदर्शक यन्त्र द्वारा परीक्षा करने पर निश्चय हो जाता है, स्वाद में बकबकापन, खटास, आदि के द्वारा भी इस विकृति का निश्चय हो सकता है। ऐसे पूति-

---

१. Influenza (वातकफज्वर)। २. शीतला=Small-pox। ३ रोमान्तिका=Measles ४. विस्फोटिका=Chicken-pox। ५. कुक्कुरकास=Whooping cough। ६. पोलियो=Anterior Poliomychitis। ७ अलर्क=Rabies। ८. जलसन्त्रास=Hydrophobia। ९. Virus Hepatitis=विषाणुजनित यकृच्छोथ। १०. चित्रकुट्टिम-व्याधि=Mosaic-disease। ११. Pathogenic fungi। १२. Ergot।

मय फल आदि का सेवन नहीं करना चाहिये।१ पर्युषित (बासी) भोजन में भी ऐसी ही फफूंदी के विकार के कारण बकबकायन-खट्टास-आदि की खराबी उत्पन्न हो जाती है, जिसके बढ़ने पर बुलबुले भी बनने लगते है जो विदग्ध होने के प्रतीक होते हैं; ऐसे विकृत पर्युषित अन्न को पुनः गरम करने पर विदग्धता बढ़ जाती है क्योंकि फफूंदी आदि को उस उष्णता के कारण और भी बढ़ने में सहायता मिलती है—इसलिए आयुर्वेद में पर्युषित एवं पुनरुष्णीकृत भोजन को निषिद्ध बताया गया है ।२

केवल विषाणु और फफूंदी ही नहीं, विविध जीवाणु-कीट-पतंग-आदि के कारण भी फल-सब्जी आदि में क्षोभ-शोथ-अर्बुद-गुल्म आदि विकार हो जाते हैं, ठीक वैसे ही जैसे हमारे शरीर में उत्पन्न होते हैं । गूलर या अंजीर का फल चीरकर देखने पर उसमें छोटे-छोटे कीट बहुधा पाये जाते हैं । ये उस फल के पौष्टिक अंश को खाकर पलते-पनपते हैं, फलतः इसकी अधिकता के साथ-साथ फल की उपयोगिता घटती जाती है । इन सपक्ष कीट-पतंगों से भिन्न कुछ सर्पिल (रेंगने वाले) कीट भी होते हैं जैसे अमरूद-भिण्डी-बैंगन-आदि में पाये जाते हैं और उन्हें विकृत-विरस-विगन्धी-विवर्ण-पूति-हानिकर बना देते हैं । इसीलिए आयुर्वेद म औषध-प्र -फल-शाक-आदि द्रव्यों की ताजगी एवं उत्तमता-उपादेयता की अनेक पहचानों में स एक यह भी बतायी है कि जन्तु-कीट-पतंग-आदि द्वारा उनके गन्ध-वर्ण-रस-स्पर्श-प्रभाव आदि उपहत न हो ।३ (संक्लिष्टं क्रिमिव्यालहिमातपैः। क्लिन्नं यत् स्यात् फलमसाधु तत्' ।।

(च.सू ।२७।३१७)

सूक्ष्म क्रिमि-कीट-जन्तु-आदि सदा फल-सब्जी-आदि की भीतरी विकारी अवस्था के कारण पलते-बढ़ते-पनपते हैं, परन्तु होते वे 'आगन्तु' ही, हैं, अर्थात् बाहर से आते हैं और फल आदि में नैर्बल्य-पाण्डुत्व-हरितत्व-आमत्व-ह्रस्वत्व-अरसत्व-विरसत्व-शुष्कत्व-क्लिन्नत्व आदि विकार४ या हीनताएं पाकर पनपते है । फल-आदि पर अभिघात-आदि के प्रभाववश तथा आतप-अग्नि-

---

१ (क) 'अपूतीनि निर्व्रणान्यगदानि च' (फलानि ग्राहयेत्)—चरक।चिकि०।१।१।४०।

(ख) 'पूति चान्नं विवर्जयेत् ।'—सुश्रुत।सूत्र।४६।४७७।

२ (क) 'क्लिष्टं व्युषितमस्वादु पूति चान्नं विवर्जयेत् शीतमन्नमुष्णीकृतं पुनः ।।'

—सुश्रुत।सूत्र।४६।४७७

(ख) 'पुनरुष्णीकृतं न च ।' (अष्टांगहृदय।सूत्रस्थान)

३ (क) ' जन्तुभिरनुपहत गन्धवर्णरसस्पर्श-प्रभावाणि प्रत्यग्राणि' (औषधानि)-चरक।क १।१०

(ख) ' कीटैरस्पृष्टम् (भेषजम्)—

चरक।कल्प।१२।४३।

(ग) '· अक्रिमीणि अपूतीनि अजन्तुजग्धानि·

(मदनफलानि)—चरक।कल्प।१।१३।

(घ) 'संक्लिष्टंक्रिमिव्यालहिमातपैः'।· क्लिन्नं यत् स्यात् फलमसाधु तत् ।।'— चरक।सूत्र।२७।३१७।

(ङ) 'क्रिमिवातातपहत·· शाक वर्ज्यम् . च ।सू.।२७।३१६—आदि ।

४ (क) 'यानि.. अहरितानि पाण्डूनि... अह्रस्वानि ·(मदनफलानि)'

—चरक-कल्प-१।१३

(ख) 'शुष्कं जीर्णमनार्तवम् । शाकं. वर्ज्यम्

चरक।सूत्र।२७।३१६।

(ग) '··आमं··। ..क्लिन्नं यत् स्यात् फलमसाधु तत् ।।' चरक।सूत्र।२७।३१७।

जल-वायु आदि के कारण२ भी क्रिमि-कीट आदि को फल में अपने पनपने की अनुकूलता मिलती है, इसीलिए इन सब अवस्थाओं वाले फल-सब्जी आदि का भी निषेध आयुर्वेद में किया गया है ।

यद्यपि ये क्रिमि-कीट-आदि बाहर से ही फल में आते हैं, परन्तु इनके प्रवेशमार्ग इतने सूक्ष्म होते हैं कि बहुधा नेत्र से नहीं दीखते । तथापि अनेक बार ये प्रवेश मार्ग स्थूल होने के कारण छिद्रों के रूप में नेत्र से देखे जा सकते हैं । तब इस प्रकार के विद्ध फल आदि को 'काण' (काणा) कहते हैं । सेव-अमरूद-खुमानी-आम-आलूबुखारा-भिण्डी-बैंगन-आदि में ऐसे 'काणत्व' के चिन्ह बहुधा पाये जाते हैं और भीतर सर्पिल कीट भी देखे जा सकते हैं । ऐसे 'काण' फल-आदि का भी सेवन नहीं करना चाहिये३ । 'काणत्व' के सम्बन्ध में एक अवधेय तत्व यह है कि अनेक बार ये 'काण'-छिद्र वस्तुतः काँटे आदि की चुभन के कारण बने होते हैं । परन्तु तब भी सावधानी रखना आवश्यक है ।

जिस प्रकार मानव-शरीर पर ऊष्मा-शैत्य-प्रवात-जलक्लेद-धूम्र-विकिरण-आदि के प्रभाववश सूर्याशुघात४-प्लुष्ट५-ऊष्मघात६-दग्ध७-हिमदग्ध८-अशनिदग्ध९-क्षकिरणदग्ध१०-विकिरणदग्ध ११-धूमोपहतत्व१२-क्लेद-कोथ१३ आदि विकार उत्पन्न होते हैं, इसी प्रकार इनके प्रभाव से फल सब्जी-वनस्पति-अनाज आदि भी विकृत-विरस एवं विकारी हो जाते हैं, बल्कि कभी-कभी तो विषोपम बन जाते हैं । बहुधा आम आदि फलों में कुछ अंश गूदे के भीतर ही श्वेत कठोर गुल्मोपम बना मिलता है जो खटीभवन१४ का परिणाम होता है । मानवशरीर की तरह आम्रतन्तु या आम्र-मज्जा का यह खटीभवन भी किसी पूर्ववर्ती अभिघातज व्रण या क्षति१५ के परिणामवश उत्पन्न होता है । स्पष्ट ही ऐसा फल त्याज्य समझना चाहिये । क्या पता उस खटीभवन के पीछे यक्ष्मा विषाणुसंक्रमण - जीवाणुसंक्रमण - व्रणीभवन का कितना इतिहास छिपा पड़ा हो । उसका पूर्ण निश्चय तो अणुवीक्षणयन्त्र आदि द्वारा सूक्ष्म-तन्तुविज्ञानीय परीक्षा१६ ही हो सकता है, परन्तु उस फल के त्याग द्वारा हम बड़े भारी आशंकित खतरे से बच अवश्य जाते हैं ।

---

२. तत्र यानि कालजातान्युपागतसम्पूर्णप्रमाणरसवीर्यगन्धानि कालातपाग्निसलिलपवनजन्तुभिरनुपहतगन्धवर्णरसस्पर्शप्रभावाणि प्रत्यग्राणि (औषधानि)' —चरक।कल्प।१।१०।

३(क) 'यानि पक्वान्यकाणानि· (मदनफलानि)'—चरक।कल्प।१।१३।

(ख) 'निर्व्रणान्यगदानि च ।' (फलानि ग्राहयेत्)—चरक।चिकि०।अ०१।पाद१।सू०४०)।

४ सूर्याशुघात=Sunstroke । ५. प्लुष्ट =Scorching । ६. ऊष्मघात=Heat-stroke ७ दग्ध=Burn । ८. हिमदग्ध=Frost-bite ९. अशनिदग्ध=Electrocuted । १०. क्षकिरणदग्ध=X Rays- Burn । ११. विकिरणदग्ध =Irradiated, Actinic-rays-burn । १२. धूमोपहत=Fumigation-choked । १३. कोथ=Gangrene । १४ खटीभवन = Calcification । १५. क्षति=Lesion । १६. Minute histological-morphological examination.

